Downloaded from https:// www.studiestoday.com

# रञ्जिनी

( द्वितीयो भागः )

## कक्षा 7



राजकीय विद्यालयों में निःशुल्क वितरण हेतु

राजस्थान राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, उदयपुर

प्रकाशक

राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

संस्करण : 2016

© राजस्थान राज्य शैक्षिक अनुसंधान एवं प्रशिक्षण संस्थान, उदयपुर
© राजस्थान राज्य पाठ्यपुस्तक मण्डल, जयपुर

मूल्य :

पेपर उपयोग : आर. एस. टी. बी. वाटरमार्क
80 जी. एस. एम. पेपर पर मुद्रित

प्रकाशक : राजस्थान राज्य पाठ्यपुस्तक मण्डल
2–2 ए, झालाना डूंगरी, जयपुर

मुद्रक :

मुद्रण संख्या :

सर्वाधिकार सुरक्षित

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भाग को छापना तथा इलैक्ट्रानिकी, मशीनी, फोटोप्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रसारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।
- किसी भी प्रकार का कोई परिवर्तन केवल प्रकाशक द्वारा ही किया जा सकेगा।

**पाठ्यपुस्तक निर्माण**
**वित्तीय सहयोगः**
**यूनिसेफ राजस्थान, जयपुर**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# आमुखम्

गतिमाने वातावरणे परिवर्तनम् आवश्यकं भवति, तेनैव विकासस्य गतिः तीव्रा भवति। विकासे अनेकानि तत्त्वानि महत्त्वपूर्णानि तेषु शिक्षा अतीव महत्त्वपूर्णं तत्त्वमस्ति। विद्यालयिशिक्षां प्रभावशालिनीं कर्तुं पाठ्यचर्यायां समये-समये परिवर्तनम् आवश्यकम्। वर्तमानकाले राष्ट्रियपाठ्यचर्यायाः आलेखः २००५ तथा च निःशुल्क-अनिवार्य-बालशिक्षा-अधिकाराधिनियमः २००९ एतद्द्वारा इदं स्पष्टं यद् अखिलशिक्षणस्य केन्द्रे बालकः एव प्रधानः भवति। अस्माकं शिक्षणप्रक्रिया एवं भवेत् यत् बालकः स्वयमेव अधिगमं कुर्यात्। अधिगमप्रक्रियायां बालकः स्वतन्त्ररूपेण शिक्षेत्, शिक्षकस्तु केवलं सहयोगी भवेत्। पाठ्यचर्यां वास्तविकरूपेण छात्रः प्राप्नुयात् एतदर्थं पाठ्य-पुस्तकं महत्त्वपूर्णं साधनम् अस्ति। परिवर्तमानायाः पाठ्यचर्यायाः सन्दर्भे पाठ्यपुस्तकेषु परिवर्तनं करणीयं भवति। अतएव राज्यसर्वकारेण नवीनं पाठ्यपुस्तकं निर्मितम्।

पाठ्यपुस्तकं सुगमं, रुचिपूर्णं, सुग्राह्यम् आकर्षकञ्च भवेत् येन बालकः सरलभाषया, विषयवस्तुनः चित्राणां, विभिन्नगतिविधिमाध्यमेन उपलब्धं ज्ञानं हृदयङ्गमं कर्तुं शक्नोति इति अवधानं पाठ्यपुस्तकनिर्माणे आवश्यकरूपेण कृतम्। छात्रः स्वसामाजिकेन, स्थानीयपरिवेशेण सम्बद्धानि ऐतिहासिक-सांस्कृतिक-संवैधानिकमूल्यानि प्रति स्वमनसि ज्ञानं निष्ठां च धारयन् सुसभ्यनागरिकरूपेण आत्मानं समाजे स्थापितुं शक्नोति।

शिक्षकेभ्यः मम विशेषाग्रहः यत् एतद्पुस्तकं न केवलं पाठ्यक्रमं पूरयितुं भवेद्, अपितु एतद्पुस्तकं स्वानुभवञ्च आधारीकृत्य छात्रम् विषयशिक्षणस्य उद्देश्यानि प्राप्त्यर्थम् अधिकाधिकानि अवसराः दद्यात्।

राजस्थान-राज्य-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-संस्थानम् उदयपुरम् पाठ्यपुस्तकानां विकासे सहयोगार्थं तान् सर्वान् संस्थानानि, सङ्गठनानि, लेखकान्, प्रकाशकाञ्च प्रति आभारम् अभिव्यनक्ति, ये पाठ्यपुस्तकानां निर्माणे, सामग्रीप्रदाने चयने च सहयोगं दत्तवन्तः। एषु NCERT राज्यसर्वकारः, विभिन्नाः राजकीयविभागाः, संस्थानानि, समाचारपत्राणि, पत्रिकाः, वेबसाइट सहैव संस्कृतभारती, विद्याभारती, सम्भाषण-सन्देशः इत्यादयः आभारयोग्याः सन्ति। सावचेतेऽपि यदि केषां लेखकानां, प्रकाशकानां संस्थानानां, सङ्गठनानां, वेबसाइट इत्यस्य च नामानि नोल्लिखितानि तदपि तेषां आभारि भवद् क्षमाप्रार्थि अस्ति। तेषां नामानि ज्ञाते सति आगामी संस्करणेषु तेषां नामानि अपि योजयिष्यन्ते।

पाठ्यपुस्तकानां गुणवत्तां वर्धयितुं प्रारम्भिकशिक्षाशासनसचिवं श्रीमन्तं कुञ्जीलालमीणां,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

माध्यमिकशिक्षाशासनसचिवं राष्ट्रियमाध्यमिकशिक्षापरिषद्-आयुक्तं च श्रीमन्तं नरेशपालगंगवारं, प्रारम्भिकशिक्षानिदेशकं श्रीमन्तं बाबूलालमीणां, माध्यमिकशिक्षानिदेशकं श्रीमन्तं सुवालालं, राजस्थानप्रारम्भिकशिक्षापरिषद्-आयुक्तं श्रीमन्तं बी.एल. जाटावतं प्रति हृदयेन आभारमभिव्यनक्ति। येषां अमूल्यैः परामर्शैर्मार्गदर्शनैश्च पुस्तकमिदं गरीयः श्रेयः च भवितुं शक्तं जातम्।

अस्य पाठ्यपुस्तकस्य निर्माणं संयुक्तराष्ट्र-बालकोषस्य (UNICEF) वित्तीय सहयोगेन अभवत्। संस्थानं संयुक्तराष्ट्र-बालकोषस्य राजस्थानप्रमुखः सेम्युअल एमं., शिक्षा-विशेषज्ञा डॉ. सुलग्ना रायं बालकोषस्य सम्बद्ध-अधिकारिणः च प्रति आभारं प्रदर्शयति येषां सहयोगं विना कार्यमिदं सफलतां न गतं स्यात्। संस्थानं सर्वाधिकारिणाम् कार्मिकाणां च ये अस्मिन् कार्यसम्पादने प्रत्यक्ष-अप्रत्यक्ष रूपेण सहयोगं कृतवन्तः तेषां प्रशंसां करोति।

माम् एतद्पुस्तकं भवताम् हस्तेषु समर्पयन् अतीवप्रसन्नता भवति। आशासे एतद् पाठ्यपुस्तकं न केवलं छात्रेभ्यः शिक्षकेभ्यश्च उपयोगि भविष्यति अपितु प्रभावशालि अपि भविष्यति।

विचाराणां परामर्शाणां समादरः लोकतन्त्रस्य वैशिष्ट्यम्। अतः राजस्थान-राज्य-शैक्षिक-अनुसन्धान एवं प्रशिक्षण-संस्थानम् उदयपुरम् सर्वदा एतद् पुस्तकं गुणवत्तापूर्णं कारयितुं भवतां विमर्शाणां स्वागतं करिष्यति।

**निदेशकः**

राजस्थान राज्य शैक्षिक अनुसंधान

एवं प्रशिक्षण संस्थानम्, उदयपुरम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यपुस्तक निर्माण समिति

संरक्षक : विनीता बोहरा, निदेशक, एस. आई. ई. आर. टी., उदयपुर।

मुख्य समन्वयक : नारायण लाल प्रजापत, उपनिदेशक प्रभारी पाठ्यपुस्तक निर्माण, एस. आई. ई. आर. टी. उदयपुर।

समन्वयक : डॉ. नर्बदाशंकर श्रीमाली, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

लेखक / सम्पादक समूह :

डॉ. शक्ति कुमार शर्मा 'शकुन्त' से. नि. सहाचार्य ज.ना.रा.वि., उदयपुर । (संयोजक)

डॉ. सुरेश चन्द्र गोयल, व. व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

शारदा स्वामी, वरिष्ठ व्याख्याता, डाईट, जोधपुर

विक्रम शर्मा, प्रधानाचार्य, सरस्वती विद्या मंदिर उ.मा.वि., मंडिया रोड, पाली

दुर्गाशंकर पारीक, उपनिरीक्षक संस्कृत शिक्षा, अजमेर संभाग, अजमेर

गायत्री जोशी, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर।

ब्रजबाला भटनागर, से. नि. व्याख्याता, एस.आई.ई.आर.टी.,उदयपुर

डॉ. प्रमोद कुमार वैष्णव, व्याख्याता, रा. महाविद्यालय, कोटा

राजेन्द्र कुमार शर्मा, व्याख्याता, राजकीय उ. मा. विद्यालय, देईखेड़ा, बूंदी

परमानन्द शर्मा, व्याख्याता, रा.उ.मा.वि., आंगुचा, भीलवाड़ा

डॉ. आशुतोष पारीक, व्याख्याता, सनातन धर्म रा. महा., ब्यावर, अजमेर

द्वारका लाल चौबदार, व्याख्याता, डाईट, कोटा

डॉ. माधवेश्वर चौधरी, व्याख्याता, रा.वरि. उपा. संस्कृत वि., तीतरिया, जयपुर

डॉ. प्रवीण पण्ड्या, व्याख्याता, आदर्श राजकीय उ. मा. वि., सांचोर, जालोर

संयम प्रकाश जैन, व्याख्याता, रा. उ. मा. वि., हरमाड़ा, जयपुर

रविशंकर शर्मा, व्याख्याता, रा. उ. मा. वि., आदर्श नगर, जयपुर

रामप्रसाद शर्मा, प्र. अ. रा. मा. विद्यालय, पचीपल्या सवाईमाधोपुर

लादूराम सीरवी, प्र. अ. आ. वि. मं. मा., ब्यावर, अजमेर

गगेन्द्रसिंह आर्य, प्र.अ. आदर्श विद्यामन्दिर मा. वि. रामगढ़, जैसलमेर



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | |
|---|---|---|
| | | बलदेव कुमार, प्र.अ., आदर्श विद्या मन्दिर माध्यमिक, आबूरोड, सिरोही |
| | | दुर्गसिंह पंवार, व. अ. हनवन्त आदर्श वि. मं.उ.मा. लालसागर, जोधपुर |
| | | मधुसूदन शर्मा, व.अ., राजकीय आदर्श उ.मा. विद्यालय, सावर, अजमेर |
| | | डॉ. अनीता अग्रवाल, अध्यापिका रा. उ. प्रा. वि., मानसरोवर, जयपुर |
| | | श्रवणकुमार विश्नोई, अ. हनवन्त आ.विद्या मन्दिर उ.मा. लालसागर, जोधपुर |
| | | पवन कुमार राजोरा, अध्यापक, रा. उ. प्रा. वि., कोशीथल, भदेसर, चित्तौड़गढ़ |
| | | श्रवण कुमार त्रिवेदी, अध्यापक आ. विद्या मन्दिर, माध्यमिक, सुमेरपुर, पाली |
| आवरण एवं साज–सज्जा | : | डॉ. जगदीश कुमावत, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर। |
| चित्रांकन | : | डॉ. राजेन्द्र कुमार वैरागी, व्याख्याता, रा. महात्मा गाँधी उ.मा.वि., रामपुरा, कोटा |
| | | गोपाल लाल नाराणीवाल,अध्यापक, रा.प्रा.वि. बुथेल, कुराबड़, उदयपुर |
| तकनीकी सहयोग | : | हेमन्त आमेटा, व्याख्याता, एस. आई. ई. आर. टी., उदयपुर। |
| | : | अभिनव पण्ड्या, क.लि., एस. आई. ई. आर. टी., उदयपुर। |
| कम्प्यूटर ग्राफिक्स | : | अविनाश कुमावत, शब्द संसार, जयपुर |
| | | गोपाल लोहार, प्रेमलता लोहार, हरिश रावत |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# शिक्षकेभ्यः

कस्य अपि विषयस्य शिक्षणसाफल्याय अध्यापकाः एव आधारभूताः सन्ति। पुस्तकपाठनकाले निम्नबिन्दून् प्रति अध्यापकाः अवधानं दद्युः इति अपेक्षा वर्तते।

१. संस्कृतशिक्षणं षष्ठीकक्षात् प्रारभ्यते। अतः छात्रेभ्यः संस्कृतध्वनिनां श्रवणस्य ग्रहणस्य च पर्याप्तः अवसरो देयः। अस्य कृते सुभाषितानां, संवादानां च माध्यमेन कक्षायाः वातावरणं संस्कृतमयं कुर्यात्।

२. पुस्तकं संस्कृतमाध्यमेन पाठयेयुः इति सर्वकारस्य अस्माकं च मनीषा वर्तते । अतः अध्यापकाः सरलसंस्कृत माध्यमेन, चित्रमाध्यमेन प्रतिकृतिमाध्यमेन, क्रियामाध्यमेन, प्रश्नोत्तरमाध्यमेन विषयवस्तु स्पष्टं कारयेयुः।

३. श्लोकस्य पाठसमये उचित-गति-लय-आरोह-अवरोहेषु ध्यानम् अपेक्षितं वर्तते। श्लोकानां गानं वैयक्तिकरूपेण सामूहिकरूपेण च कारयितुं शक्यते।

४. संवादपाठानां अभिनयं कारयित्वा पाठयेयुः।

५. कथापाठानां पाठनकाले आरम्भे सम्पूर्ण-कथायाः सारं श्रावयित्वा क्रमशः प्रत्येकं पंक्तिः प्रश्नोत्तरमाध्यमेन स्पष्टं कारयतु।

६. योग्यताविस्तारमध्ये समागतान् नियमान् अधिक-उदाहरणैः स्पष्टेयुः।

७. समकालिक-सांस्कृतिक-वातावरणं दृष्ट्वा ज्ञानस्य सततं विकासं कुर्यात्। निरन्तरं तेषां मूल्याङ्कनञ्च भवेत्। अस्मिन् सन्दर्भे क्रियात्मक-गतिविधयः, क्रीडामञ्चनं, परियोजना, ज्ञानस्य सङ्कलनम् इत्यादिप्रायोगिक-गतिविधिभिः शिक्षणं आनन्ददायि सरसं च भवेत् इत्यपि अवधेयम्। अभिभावकाः अपि छात्राणां योग्यताविकासाय अवधानं दद्युः शिक्षकाणां च सहयोगं कुर्युः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अनुक्रमणिका


| पाठक्रमाङ्कः | पाठस्य नाम | पृष्ठसंख्या |
|---|---|---|
| प्रथमः पाठः | भारतभूवन्दना | १ |
| द्वितीयः पाठः | बुद्धिर्यस्य बलं तस्य | ६ |
| तृतीयः पाठः | संस्कृतदिवसः | १२ |
| चतुर्थः पाठः | आदिकविः वाल्मीकिः | १९ |
| पञ्चमः पाठः | नित्यं कर्तव्यम् | २६ |
| षष्ठः पाठः | स्वास्थ्यम् | ३२ |
| सप्तमः पाठः | धन्योऽयं दानवीरः | ३८ |
| अष्टमः पाठः | आदर्शपरिवारः | ४४ |
| नवमः पाठः | पुष्करमेलापकः | ४९ |
| दशमः पाठः | अमृतबिन्दवः | ५६ |
| एकादशः पाठः | उद्यानविहारः | ६२ |
| द्वादशः पाठः | पर्यावरणचेतना | ६७ |
| त्रयोदशः पाठः | प्रहेलिकाः | ७४ |
| चतुर्दशः पाठः | आपत्प्रबन्धनम् | ८२ |
| पञ्चदशः पाठः | डॉ.ए.पी.जे. अब्दुलकलामः | ८७ |
| षोडशः पाठः | सूक्तयः | ९१ |
| सप्तदशः पाठः | उदासीनाचार्यः श्रीचन्द्रः | ९७ |
| परिशिष्टम् | शब्दरूपाणि, धातुरूपाणि, इमानि अपि अवलोकयत | १०२ |




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रथमः पाठः
१

# भारतभूवन्दना

## ( चतुर्थी विभक्तिः )

(प्रस्तुतपाठे पुण्यभारतभूमेः वन्दनं कृतमस्ति। भारतस्य नद्यः,पर्वताः, वनानि एव न अपितु प्रत्येकं कणः अपि रमणीयः प्रेरकश्च अस्ति। भारतभूः मातृवत् अस्मभ्यं सर्वं ददाति अतः आदौ एताम् आराधयामः।)



मातृभूमे! नमो मातृभूमे ! नमः ।
मातृभूमे! नमो मातृभूमे ! नमः ।।
तव गिरिभ्यो नमस्ते नदीभ्यो नमः ।
तव वनेभ्यो नमो जनपदेभ्यो नमः ।।१ ।।
मातृभूमे .........................

तव कणेभ्यो नमस्ते अणुभ्यो नमः।
मातृभूमे! नमो मातृभूमे ! नमः ।।२ ।।
मातृभूमे ...........................

प्राणदे! त्राणदे! देवि! शक्तिप्रदे!
ऋद्धिदे! सिद्धिदे! भुक्तिमुक्तिप्रदे! ।।३ ।।
मातृभूमे ...........................

सर्वदे! सर्वदा देवि! तुभ्यं नमः ।
मातृभूमे! नमो मातृभूमे! नमः ।।४ ।।
मातृभूमे ...........................

**भावार्थः** – भारतमातः! वयं त्वां प्रणमामः ।तव पर्वतेभ्यः अस्माकं नमस्कारः ।तव नदीभ्यः अस्माकं नमांसि ।भवत्याः वनेभ्यः जनपदेभ्यः, कणेभ्यः, सूक्ष्मेभ्यः अणुभ्यःच मम सादरं प्रणामाः । हे प्राणदायिनि! हे रक्षणकर्त्रि! हे शक्तिदात्रि ! हे समृद्धिदात्रि ! हे सिद्धिदात्रि ! भोगमोक्षप्रदायिनि मातृभूमे !तुभ्यं अस्माकं प्रणामाः ।भो देवि! सर्वदा भवत्यै अस्माकं सादरं वन्दनानि ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| नमः | नमस्कारः | नमस्कार |
| तव | भवत्याः | तुम्हारे |
| गिरिभ्यः | नगेभ्यः | पर्वतों को |
| नदीभ्यः | सरिद्भ्यः | नदियों को |
| वनेभ्यः | अरण्येभ्यः | वनों को |
| जनपदेभ्यः | मण्डलेभ्यः | जिलों को |
| कणेभ्यः | अंशेभ्यः | कणों को |
| अणुभ्यः | सूक्ष्मकणेभ्यः | अणुओं को |
| प्राणदे ! | प्राणदात्रि ! | प्राण देने वाली |
| त्राणदे ! | रक्षणकर्त्रि ! | रक्षा करने वाली |
| शक्तिप्रदे ! | बलदायिनि ! | शक्ति प्रदान करने वाली |
| ऋद्धिदे ! | समृद्धिदायिनि ! | सम्पन्नता देने वाली |
| सिद्धिदे ! | सफलतादात्रि ! | पूर्णता देने वाली |
| भुक्तिमुक्तिप्रदे ! | भोगमुक्तिदायिनि ! | भोग और मुक्ति देने वाली |
| सर्वदे ! | सर्वदात्रि ! | सब कुछ देने वाली |
| सर्वदा | सदैव | सदा |
| तुभ्यम् | तव कृते | तुमको |

## अभ्यासः

१. निम्नलिखितशब्दानाम् उच्चारणं कुरुत –

| | | | |
|---|---|---|---|
| नदीभ्यो | जनपदेभ्यो | त्राणदे | शक्तिप्रदे |
| ऋद्धिदे | सिद्धिदे | भुक्तिमुक्तिप्रदे | मातृभूमे |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**२. एकवाक्येन उत्तरत –**

(क) पाठानुसारेण कविः कां नमस्करोति ?

(ख) प्राणदात्री का अस्ति ?

(ग) मातृभूमेः केभ्यः भागेभ्यः नमः ?

(घ) मातृभूमिः किं किं ददाति ?

**३. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –**

| त्राणदे , नमः, अणुभ्यः , भुक्तिमुक्तिप्रदे |
|---|

(क) मातृभूमे ! नमो मातृभूमे !................................ ।

(ख) ऋद्धिदे ! सिद्धिदे !........................................ ।

(ग) प्राणदे !...............................देवि ! शक्तिप्रदे ।

(घ) तव कणेभ्यो नमस्ते ............................... नमः ।

**४. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) <u>कणेभ्यः</u> नमस्ते ।

(ख) मातृभूमिः <u>प्राणदात्री</u> अस्ति ।

(ग) <u>अणुभ्यः</u> नमः ।

(घ) <u>भारतभूमिः</u> शक्तिप्रदात्री अस्ति ।

**५. चित्राणाम् आधारेण चतुर्थीविभक्तेः रूपाणि ज्ञात्वा रिक्तस्थानानि पूरयत –**



अतिथिः **छात्राय** पारितोषिकं ददाति ।

(क)




अतिथिः **छात्रायै** पारितोषिकं ददाति ।

(ख)



अतिथिः **नर्तक्यै** पारितोषिकं ददाति ।

(ग)

| | | | | | |
|---|---|---|---|---|---|
| **यथा**– युवकः | युवकाय | बालिका | बालिकायै | नर्तकी | नर्तक्यै |
| मयूरः | ............ | छात्रा | ............ | जननी | ............ |
| सैनिकः | ............ | महिला | ............ | भगिनी | ............ |
| बालकः | ............ | स्थालिका | ............ | लेखनी | ............ |
| नायकः | ............ | अभ्यासपुस्तिका | ............ | नगरी | ............ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



६. **कोष्ठके प्रदत्तस्य शब्दस्य शुद्धं रूपं लिखत –**

यथा – पिता निर्धनाय **धनं** ददाति। (निर्धनः)

(क) माता ..................................धनं ददाति। (पुत्रः)

(ख) जिज्ञासुः ज्ञानस्य ..................समयं ददाति। (अर्जनम्)

(ग) तरुणः .........................पुस्तकानि ददाति । (मित्रम्)

(घ) जनकः .........................शाटिकां ददाति । (जननी)

(ङ) ...............................................नमः । (सूर्यः)

(च) ...............................................नमः । (शिक्षिका)

७. **चतुर्थी विभक्तिं प्रयुज्य नूतनवाक्यानि रचयत –**

(क) ............................................. ।

(ख) ............................................. ।

(ग) ............................................. ।

(घ) ............................................. ।

(ङ) ............................................. ।

८. **चतुर्थीविभक्तेः रूपाणि लिखत –**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | ग्रामाय | ग्रामाभ्याम् | ग्रामेभ्यः |
| | कृषकाय | ................. | ................ |
| | वित्तकोषाय | ................. | ................. |
| यथा– | वाटिकायै | वाटिकाभ्याम् | वाटिकाभ्यः |
| | पाकशालायै | ................. | ................. |
| | मालायै | ................. | ................. |
| यथा– | अङ्गुल्यै | अङ्गुलीभ्याम् | अङ्गुलीभ्यः |
| | भगिन्यै | ................. | ................. |
| | पितामह्यै | ................. | ................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



९. रेखाङ्कितपदं द्विवचने बहुवचने च परिवर्त्य रिक्तस्थाने वाक्यं लिखत –

**यथा** – गुरुः शिष्याय ज्ञानं ददाति। गुरुः शिष्याभ्यां ज्ञानं ददाति। गुरुः शिष्येभ्यः ज्ञानं ददाति।

(क) पीयूषः मित्राय पुस्तकं ददाति। ............................ ................................

(ख) पितामही पौत्राय चाकलेहं ददाति। ............................ ................................

(ग) अध्यापकः छात्रायै गृहकार्यं ददाति। ............................ ................................

(घ) स्वामी सेविकायै कार्यं वदति। ............................ ................................

(ङ) अहं तस्मै परामर्शं वदामि। ............................ ................................

## योग्यता-विस्तारः

सादरं समीहताम् वन्दना विधीयताम्
श्रद्धया स्वमातृभू-समर्चना विधीयताम् ।।
आपदो भवन्तु वा, विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयतां, वीरता विधीयताम्
निर्भयेन चेतसा पदं पुरो निधीयताम् ।।
।। सादरं ...................... ।।
प्राणदायिनी इयं त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयम्।
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम् ।।
।। सादरं ...................... ।।

( श्रीवासुदेवद्विवेदी शास्त्री )

**अध्यापकाय निर्देशः –**

। अध्यापकः प्रदत्तगीतस्य सस्वरवाचनं कारयेत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

द्वितीयः पाठः २

# बुद्धिर्यस्य बलं तस्य?

( क्तवतु , लङ्लकारः च )

(हितोपदेशे बालानां बोधाय पशुपक्षीणां संवादमाध्यमेन रोचकाः कथाः वर्णिताः सन्ति। तासु एषा अपि मनोहरकथा, अत्र वयं काकस्य चातुर्यविषये जानीमः।)



एकस्मिन् वने कश्चन महावृक्षः आसीत्। तत्र एकः काकः पत्न्या सह वसति स्म। तस्य एव वृक्षस्य कोटरे एकः कृष्णः सर्पः अपि वसति स्म। यदा काकस्य पत्नी प्रसूता भवति तदा कृष्णसर्पः तस्याः अण्डानि खादति स्म। एतेन दुःखेन काकः तस्य च पत्नी महद् दुःखम् अनुभवतः स्म।



अतः एकदा काकः स्वमित्रस्य शृगालस्य समीपं गत्वा उक्तवान् भो मित्र ! सः कृष्णसर्पः कथं मारणीयः। उपायं सूचयतु इति । शृगालः एकम् उपायं सूचितवान् । तत् श्रुत्वा काकः बहु सन्तुष्टः। तदनन्तरं काकः उड्डीय नगरम् आगतवान्। तत्र महाराजस्य सरोवरे अन्तःपुरस्त्रियः जलक्रीडायां मग्नाः आसन्। तासां वस्त्राणि आभरणानि च सरोवरस्य सोपानेषु स्थापितानि आसन्। काकः तत्र गतवान् एकं सुवर्णहारं ग्रहीत्वा अरण्याभिमुखं प्रस्थितवान्। तद् दृष्ट्वा राजभटाः काकम् अनुसृतवन्तः।



काकः अरण्यम् आगत्य महावृक्षस्य कोटरे तं हारं पातितवान्। स्वयं दूरं गतवान् च। राजभटाः तत्र आगतवन्तः। कोटरे हारं दृष्टवन्तः । तदा तत्र स्थितः कृष्णसर्पः कोपेन बहिः आगतवान्। राजभटाः दण्डप्रहारेण तं मारितवन्तः। हारं च नीतवन्तः। तदनन्तरं काकः स्वपत्न्या सह सुखेन जीवितवान्।

**"उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः"**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| महावृक्षः | विशालवृक्षः | बड़ा वृक्ष |
| तत्र | तस्मिन् स्थाने | वहाँ |
| कोटरे | वृक्षस्य विवरे | वृक्ष की खोखर में |
| सर्पः | भुजङ्गः | सांप |
| एकदा | एकस्मिन् समये | एक समय |
| समीपम् | निकटे | पास में |
| श‍ृगालस्य | जम्बूकस्य | सियार के |
| कथञ्चित् | केनाऽपि प्रकारेण | कैसे भी |
| सरोवरस्य | तडागस्य | तालाब के |
| सोपानेषु | श्रेणीषु | सीढियों पर |
| सुवर्णहारम् | स्वर्णस्य हारम् | सोने के हार को |
| अरण्याभिमुखम् | वनं प्रति | जंगल की ओर |
| कोपेन | क्रोधेन | क्रोध में आकर |
| बहिः | बाह्यभागे | बाहर |
| राजभटाः | राजपुरुषाः | राजा के सैनिक |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

| | | | | |
|---|---|---|---|---|
| कश्चन | श‍ृगालः | सन्तुष्टः | अन्तःपुरस्त्रियः | सुवर्णहारः |
| अरण्याभिमुखम् | प्रस्थितवान् | दृष्टवन्तः | यच्छक्यम् | पराक्रमैः । |

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) वृक्षस्य कोटरे कः वसति स्म ?

(ख) श‍ृगालः कस्य मित्रम् आसीत् ?

(ग) काकः सुवर्णहारं ग्रहीत्वा कुत्र प्रस्थितवान् ?

(घ) के दण्डप्रहारेण कृष्णसर्पं मारितवन्तः ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**३. निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) काकः सुवर्णहारं ग्रहीत्वा कुत्र पातितवान् ?

(ख) काकः शृगालस्य समीपं गत्वा किम् उक्तवान् ?

(ग) अन्तःपुरस्त्रियः कुत्र मग्नाः आसन् ?

(घ) काकस्य शावकान् कः खादति स्म ?

**४. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

| |
|---|
| शृगालः, कृष्णसर्पः, अन्तःपुरस्त्रियः, पत्न्या, कोटरे |

(क) महावृक्षे एकः काकः ........................ सह वसति स्म।

(ख) सरोवरे ............................ जलक्रीडायां मग्नाः आसन् ।

(ग) ...................................................... कोपेन बहिः आगतवान्।

(घ) काकः अरण्यम् आगत्य महावृक्षस्य ............................. तं हारं पातितवान् ।

(ङ) .............................एकम् उपायं सूचितवान्।

**५. उपयुक्तशब्देन वाक्यं पूरयत -**

(क) राजभटाः दण्डप्रहारेण ...................मारितवन्तः। (काकं/शृगालं/कृष्णसर्पं)

(ख) .............................काकम् उपायं सूचितवान्। (राजपुरुषः/ शृगालः/ कृष्णसर्पः)

(ग) काकः महावृक्षस्य कोटरे .................पातितवान्। (हारं/ फलं /वस्त्रम् )

(घ) ............................ तस्य शावकान् खादति स्म। (काकः/शृगालः/कृष्णसर्पः)

**६. रेखाङ्कितानिपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

(क) <u>शृगालः</u> एकम् उपायं सूचितवान्।

(ख) एकः काकः <u>महावृक्षे</u> पत्न्या सह वसति स्म।

(ग) काकः <u>शृगालस्य</u> मित्रम् आसीत्।

(घ) कृष्णसर्पः <u>काकस्य</u> शावकान् खादति स्म।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



७. **निम्नलिखितपदानां विभक्तिं वचनं च लिखत –**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा– | शृगालस्य | षष्ठी | एकवचनम् |
| (क) | हारम् | ................. | ..................... |
| (ख) | शावकान् | ................. | ..................... |
| (ग) | सरोवरस्य | ................. | ..................... |
| (घ) | राजभटाः | ................. | ..................... |
| (ङ) | वृक्षस्य | ................. | ..................... |

८. **प्रदत्तक्रियापदानां भूतकालिकानि क्तवतु प्रत्ययान्तानि रूपाणि लिखत –**

| | पदम् | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| यथा– | पठति | पठितवान् | पठितवती | पठितवत् |
| (क) | लिखति | ................... | ...................... | ....................... |
| (ख) | खादति | ................... | ...................... | ....................... |
| (ग) | क्रीडति | ..................... | ...................... | ....................... |
| (घ) | पिबति | ...................... | .................... | ....................... |
| (ङ) | चलति | ..................... | ...................... | ....................... |
| (च) | गणयति | ...................... | ...................... | ....................... |
| (छ) | पालयति | ...................... | ...................... | ....................... |

९. **वर्तमानकालस्य वाक्यानि क्तवतुप्रत्यय प्रयोगेण भूतकाले परिवर्तयत –**

| | | |
|---|---|---|
| (क) | छात्रः पठति। | छात्रः पठितवान्। |
| (ख) | अतिथिः आगच्छति। | .............................. |
| (ग) | पिता धनं ददाति। | .............................. |
| (घ) | महिला नियमं पालयति। | ............................. |
| (ङ) | मित्रं धावति। | ............................. |
| (च) | जलं पतति। | .............................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



१०. निम्नाङ्कितवाक्येषु वचनपरिवर्तनं कृत्वा रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | अश्व: धावितवान् | अश्वौ धावितवन्तौ । | अश्वा: धावितवन्त: । |
| | पत्रकार: गतवान् । | ......................... । | .......................... । |
| | वानर: कूर्दितवान् । | ......................... । | .......................... । |
| यथा – | बालिका पठितवती । | बालिके पठितवत्ये । | बालिका: पठितवत्य: । |
| | लेखिका लिखितवती । | ......................... । | .......................... । |
| | अध्यापिका पाठितवती । | ......................... । | .......................... । |
| यथा – | मित्रम् आगतवत् । | मित्रे आगतवती । | मित्राणि आगतवन्ति । |
| | फलं पतितवत् । | ......................... । | .......................... । |
| | यानम् आगतवत् । | ......................... । | .......................... । |

## योग्यता-विस्तार:

१. हितोपदेशस्य रचयिता नारायणपण्डित: अस्ति। हितोपदेशे भारतीयजनमानसस्य परिवेषेण प्रभाविता: उपदेशात्मककथा: सन्ति। हितोपदेशकथा: अतीवसरला: सरसा: सुग्राह्याश्च भवन्ति। सर्वा अपि कथा: परस्परम् अन्योन्याश्रिता: सन्ति। हितोपदेशे कथा: चतुर्षु भागेषु विभक्ता: विद्यन्ते –

1. मित्रलाभ: 2. सुहृद्भेद: 3. विग्रह: 4. सन्धि:

२. धातुप्रत्ययसंयोगेन निर्मितानि कानिचन विशेषरूपाणि जानीत –

| | धातु: | | प्रत्यय: | | पदम् |
|---|---|---|---|---|---|
| यथा– | वच् | + | क्तवतु | = | उक्तवान् |
| | पच् | + | क्तवतु | = | पक्ववान् |
| | प्र + स्था | + | क्तवतु | = | प्रस्थितवान् |
| | गम् | + | क्तवतु | = | गतवान् |
| | दृश् | + | क्तवतु | = | दृष्टवान् |
| | नी | + | क्तवतु | = | नीतवान् |
| | कृ | + | क्तवतु | = | कृतवान् |
| | पा | + | क्तवतु | = | पीतवान् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





बालकः पतति


बालकः पतितवान्

### ३. मञ्जूषातः उचितशब्दं चित्वा अधोलिखितकथां पूरयत –





| पिपीलिकाम् , मर्दयितुम् , शुण्डायाम् , प्रयतितवान् , गजः , त्वाम् , मारयितुम् |
|---|

एकदा एकः .................... गच्छति स्म। स मार्गे एकां ........................... दृष्टवान्। गजः अवदत् रे पिपीलिके ! इतः अपसर नो चेत् अहं ........................... मर्दयिष्यामि। पिपीलिका कथयति "भो गज ! भवान् तु महान् अस्ति" मां कथं ......................... शक्नोति। बलवान् न एवं करोति। गर्वेण गर्वितः गजः पुनरवदत् अपसर इति। गते काले एकदा पिपिलिका गजस्य ......................... प्राविशत्। पीडितः गजः अवदत् कोऽयं मां .............. इच्छति। पिपीलिका वदति अहं सः एव तुच्छजीवः यं भवान् मारयितुं ................................ । किन्तु अहं त्वां न मारयामि। अहं न तुच्छचिन्तनशीला।

**अध्यापकाय निर्देशः –**

- शिक्षकः छात्रान् गणे विभज्य मण्डले वा उपावेशयत्। छात्राः एकैकं वाक्यं रचयित्वा कथां पूरयेयुः।
- शिक्षकः छात्राणां माध्यमेन अनन्तरकथारचनां नवीनकथारचनां वा कारयेत्। अत्र प्रत्येकं छात्रोऽपि सहभागी भवेत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तृतीयः पाठः
३

# संस्कृतदिवसः

( पञ्चमीविभक्तिः )




**धीरजः** – भोः मित्र! अद्य अहं प्रभाते "जयतु संस्कृतं, जयतु भारतम्" "संस्कृतभाषा अस्माकं भाषा" इत्यादीनि उद्घोषवाक्यानि श्रुतवान्। किम् इदम्? के कृतवन्तः? किमर्थं कृतवन्तः? इति विस्तरेण वद।

**जयेशः** – किं भवान् न जानाति? अद्य संस्कृतदिवसः। श्रावणमासस्य पूर्णिमायां तिथौ संस्कृतदिवसः आचर्यते। अस्मिन् एव दिने रक्षा– बन्धनोत्सवः अपि भवति।

**धीरजः** – संस्कृतदिवसस्य रक्षाबन्धनोत्सवस्य च मध्ये कोऽपि सम्बन्धः अस्ति किम्?

**जयेशः** – आम्, अस्ति। प्राचीनकाले श्रावणपूर्णिमादिने गुरुकुलेषु अध्ययनस्य आरम्भः भवति स्म। अत्र गुरवः शिष्याणां हस्तेषु शिष्याश्च गुरूणां हस्तेषु रक्षासूत्राणि बध्नन्ति स्म। परस्परं रक्षाकामनाञ्च कुर्वन्ति। तदा आरभ्य अस्मिन् दिने वयं रक्षाबन्धनोत्सवम् आचरामः।

**इन्द्रेशः** – साधु, उक्तं त्वया। किन्तु अस्मिन् दिने संस्कृतदिवसः कथम्?

**जयेशः** – पूर्वं सर्वे अध्ययनस्य आरम्भे वेदाध्ययनम् एव कुर्वन्ति स्म। वेदास्तु संस्कृतेन एव लिखिताः सन्ति अतः संस्कृतस्य आरम्भकारणात् एतद् दिनं 'संस्कृतदिवसः' इति मन्यते।

**इन्द्रेशः** – तर्हि अस्मिन् दिने किं किम् आयोजनं भवति?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




**जयेशः** – अत्र प्रातः बालाः मिलित्वा उद्घोषवाक्यानि वदन्तः वीथिषु प्रभाते भ्रमणं कुर्वन्ति। संस्कृतवाक्यैः अभिवादनं चर्चां च कुर्वन्ति। स्थाने स्थाने समारोहाः भवन्ति। संस्कृतविदुषां सम्मानकार्यक्रमाः भवन्ति। विद्यालयेषु श्लोकपाठप्रतियोगिता, नाटकप्रतियोगिता, प्रश्नमञ्चः, कथाकथनम्, श्रुतिलेखः, गीतप्रतियोगिता इत्यादयः प्रतियोगिताः भवन्ति। यदा एते कार्यक्रमाः सप्ताहं यावत् भवन्ति स संस्कृतसप्ताहः उच्यते।

**सुधीरः** – एताः प्रतियोगिताः सर्वेषु विद्यालयेषु भवन्ति किम्?

**जयेशः** – आम्।

**इन्द्रेशः** – तेन तु छात्राणां मध्ये एव जागरुकता भवति। संस्कृतं प्रति समाजे कथम् अनुरागः भवेत्।

**धीरजः** – तदर्थं वयं एताः प्रतियोगिताः च समाजेऽपि आयोजयाम, तदा तेऽपि सहभागिनः जागरुकाश्च भविष्यन्ति। शोभायात्रा तु करणीया एव।




**इन्द्रेशः** – मित्र! एतत् सर्वं तु करणीयमेव। अद्य आरभ्य आवां संस्कृतेन सम्भाषणं कुर्वः। तेन एषा भाषा सरला अस्ति, सरसा अस्ति अस्माकं च भाषा अस्ति इति सर्वेषां मनसि भावः भविष्यति।

**धीरजः** – आम्। बन्धो! संस्कृतम् अस्माकं भारतीयानां गौरवम् अभिज्ञानं च अस्ति। संस्कृतेन विना अस्माकं भारतीयानां किम् अस्तित्वम्?

**इन्द्रेशः** – इयम् तु अस्माकं पूर्वजानां अपि भाषा अस्ति।

**सुधीरः** – आम् सत्यम्।

**जयेशः** – सत्यमेव।

**इन्द्रेशः** – तर्हि तत्र अम्बेडकरसभागारे संस्कृतसप्ताहकार्यक्रमः प्रचलति तत्र चलावः। आम् चलावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| प्रभाते | प्रात:काले | प्रात:काल में |
| किमर्थम् | केन कारणेन | किसलिए |
| विस्तरेण | विस्तारपूर्वकम् | विस्तार से |
| बध्नन्ति स्म | बन्धनं कुर्वन्ति स्म | बाँधते थे |
| आचरामः | आचरणं कुर्मः | आचरण करें |
| साधु | उचितम् | ठीक |
| अभिवादनम् | नमस्कारः | अभिवादन |
| जागरुकता | जागृतिः | जागरुकता |
| अभिज्ञानम् | लक्षणचिह्नम् | पहचान |

## अभ्यासः

**१. निम्नलिखितपदानाम् उच्चारणं कुरुत -**

| | | | |
|---|---|---|---|
| इत्यादीनि | संस्कृतदिवसः | पूर्णिमायाम् | बन्धनोत्सवः |
| रक्षाबन्धनोत्सवस्य | प्रतियोगिताः | गौरवम् | अस्तित्वम् |

**२. एकपदेन उत्तरत -**

(क) श्रावणपूर्णिमायां कः उत्सवः भवति ?

(ख) आचार्याः शिष्याणां हस्तेषु किं बध्नन्ति ?

(ग) वेदाः कया भाषया लिखिताः सन्ति ?

(घ) प्रतियोगिताः कुत्र आयोजनीयाः ?

(ङ) अस्माकं भारतीयानां गौरवं किम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**३. एकवाक्येन उत्तरत –**

(क) संस्कृतसप्ताहस्य आचरणं कदा भवति ?

(ख) संस्कृतसप्ताहे के कार्यक्रमाः भवन्ति ?

(ग) संस्कृतदिवसे केषां सम्मानः भवति ?

(घ) आवां केन सम्भाषणं कुर्वः ?

(ङ) पूर्वं कुत्र अध्ययनं भवति स्म ?

**४. सुसङ्गतपदानि मेलयत –**

| | | |
|---|---|---|
| (क) दीपावली | – | श्रावणपूर्णिमा |
| (ख) रक्षाबन्धनम् | – | कार्तिकामावस्या |
| (ग) गीताजयन्ती | – | भाद्रपदकृष्णाष्टमी |
| (घ) कृष्णजन्माष्टमी | – | मार्गशीर्षशुक्ल एकादशी |
| (ङ) श्रीगणेशचतुर्थी | – | भाद्रपदशुक्लचतुर्थी |

**५. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –**

| शोभायात्रा, जयतु संस्कृतम्, पूर्णिमा, संस्कृतवाक्यैः, आचार्याः |
|---|

(क) श्रावणमासस्य .............................. तिथौ संस्कृतदिवसः भवति ।

(ख) अहं प्रातः .................................... इति उद्घोषवाक्यं श्रुतवान् ।

(ग) ............................... शिष्याणां हस्तेषु रक्षासूत्राणि बध्नन्ति स्म ।

(घ) संस्कृतदिवसे .................................... जनाः अभिवादनं चर्चां च कुर्वन्ति ।

(ङ) ........................................... तु करणीया एव ।

**६. चित्राधारेण पञ्चमीविभक्तेः रूपाणि जानीत रिक्तस्थानानि च पूरयत –**




बालकः वृक्षात् पतति ।




आम्रं शाखायाः पतति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | | | | | |
|---|---|---|---|---|---|---|
| यथा- | वृक्षः | - | वृक्षात् | गृहम् | - | गृहात् |
| | हस्तः | - | ........................ | मन्दिरम् | - | ..................... |
| | आकाशः | - | ........................ | यानम् | - | ..................... |
| यथा- | शाखा | - | शाखायाः | कूपी | - | कूप्याः |
| | माला | - | ........................ | जननी | - | ..................... |
| | चन्द्रिका | - | ........................ | नगरी | - | ..................... |

**७. कोष्ठके प्रदत्तशब्दस्य समुचितरूपं संयोज्य वाक्यानि वदत -**

(क) जलम् ................................... पतति। (आकाशः)

(ख) कृषकः .............................. आगच्छति। (क्षेत्रम्)

(ग) महिला .............................. आगच्छति। (नदी)

(घ) ................................ फलानि पतन्ति। (वृक्षः)

(ङ) वस्त्राणि ................................ पतन्ति। (कपाटिका)

**८. रिक्तस्थानानि पूरयत -**

| | पदम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा- | वृक्षः | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| | ग्रामः | ................ | ................ | ................ |
| | युवकः | ................ | ................ | ................ |
| यथा- | महिला | महिलायाः | महिलाभ्याम् | महिलाभ्यः |
| | वाटिका | ................ | ................ | ................ |
| | जवनिका | ................ | ................ | ................ |
| यथा- | लेखनी | लेखन्याः | लेखनीभ्याम् | लेखनीभ्यः |
| | मार्जनी | ................ | ................ | ................ |
| | अङ्गुली | ................ | ................ | ................ |
| | फलम् | फलात् | फलाभ्याम् | फलेभ्यः |
| | नगरम् | ................ | ................ | ................ |
| | नेत्रम् | ................ | ................ | ................ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



९. एतेषु वाक्येषु रेखांकितपदानां द्विवचने बहुवचने च प्रयोगं कृत्वा वाक्यानि रचयत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | वृक्षात् फलानि पतन्ति | वृक्षाभ्याम् फलानि पतन्ति | वृक्षेभ्यः फलानि पतन्ति |
| (क) | ग्रामात् जनाः आगच्छन्ति | ............................. | ............................. |
| (ख) | पुस्तकात् पत्राणि पतन्ति | ............................. | ............................. |
| (ग) | बालाः विद्यालयात् आगच्छन्ति | ............................. | ............................. |
| (घ) | छात्राः पाठशालायाः गच्छन्ति | ............................. | ............................. |
| (ङ) | महिलाः नद्याः जलम् आनयन्ति | ............................. | ............................. |

## योग्यता-विस्तारः

१. संस्कृतभाषायाः लेखनस्य सम्भाषणस्य च अभ्यासाय एतानि कार्याणि करणीयानि -

- आकाशवाण्याः संस्कृतवार्ताश्रवणम्।
- दूरदर्शने संस्कृतवार्ताः, वार्तावली, संस्कृतनाटकानि इत्यादीनां श्रवणं दर्शनञ्च।
- संस्कृतसम्भाषणशिविरम्।
- संस्कृतव्याकरणाभ्यासवर्गः।
- भाषाबोधनवर्गः।
- शिक्षकप्रशिक्षणवर्गः।
- संस्कृतमासपत्रिकाःपठनीयाः। यथा-भारती, सम्भाषण-सन्देशः इत्यादिन्यः अन्याः अपि।
- दैनिकसंस्कृतवार्तापत्रपठनम्- सुधर्मा इति।
- प्रतिदिनं संस्कृतरचनालेखनम्।
- संस्कृतेन वार्तालापस्य आरम्भः।
- लघुलेखस्य लेखनम्।
- अनुलेखस्य लेखनम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



२. पञ्चमीविभक्तेः सर्वनामशब्दरूपाणि अपि जानीम -

| | शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| पुँल्लिङ्गे नपुंसकलिङ्गे च | तत् | तस्मात् | ताभ्याम् | तेभ्यः |
| | एतत् | एतस्मात् | एताभ्याम् | एतेभ्यः |
| | किम् | कस्मात् | काभ्याम् | केभ्यः |
| | भवत् | भवतः | भवद्भ्याम् | भवद्भ्यः |
| स्त्रीलिङ्गे | तत् | तस्याः | ताभ्याम् | ताभ्यः |
| | एतत् | एतस्याः | एताभ्याम् | एताभ्यः |
| | किम् | कस्याः | काभ्याम् | काभ्यः |
| | भवत् | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| त्रिषु लिङ्गेषु | अस्मद् | मत् | आवाभ्याम् | अस्मत् |
| | युष्मद् | त्वत् | युवाभ्याम् | युष्मत् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चतुर्थः पाठः
४

# आदिकविः वाल्मीकिः

( सप्तमीविभक्तिः )

(संस्कृतसाहित्यस्य आदिकवेः महर्षिवाल्मीकेः जीवनगाथा तु अतीव विचित्रा एव अस्ति। एकचिन्तनमात्रेण एव घटनाविशेषेण वा तस्य जीवनं कथं परिवर्तितम् अभवत्। आगच्छन्तु वयं अनेन पाठमाध्यमेन अवगच्छामः।)

एकदा सघने वने सप्त ऋषयः गच्छन्ति स्म। तेषां कर्णपथे भयङ्करः ध्वनिः पतितः। "भोः ऋषयः! तिष्ठन्तु युष्माकं समीपे विद्यमानानि रुद्राक्षकमण्डलुवस्त्रादीनि भूतले अत्र स्थापयन्तु। एतेषु ममाधिकारः न युष्माकम्।" "भोः त्वं कः?" इति ऋषयः अपृच्छन्। "किं यूयं न जानीथ ? अहं रत्नाकरः नामधेयो ख्यातनामा दस्युः वनेऽस्मिन् मम भयकारणेन न कोऽपि प्रवेष्टुम् उत्सहते" इत्यवदत् रत्नाकरः। ऋषयः अवदन् "वत्स! केषां कृते स्वजीवने पापाचरणं करोषि?" रत्नाकरः अवदत् "अहं मम कुटुम्बपालनाय पोषणाय च इदं करोमि।" "भवान् येषां कृते इदमाचरति तान् पृच्छ। किम् तेऽपि अस्मिन् पापकर्मणि भागभूताः भविष्यन्ति?"



रत्नाकरः गृहं गत्वा पत्नीं पुत्रादीन् अपृच्छत्। "यः पापकर्म करिष्यति तस्य फलमपि स एव प्राप्स्यति, वयं न" इति कुटुम्बजनाः अवदन्। इदं श्रुत्वा रत्नाकरः स्तब्धः अभवत्। तस्य हृदये महापीडा जाता। आगत्य ऋषीणां चरणेषु अनमत्। ऋषिभिः प्रदत्तं रामनामजपम् आरभत् सः। तस्य शरीरे च पिपिलिकाभिः रचितेन वल्मीकेन वाल्मीकिः इति नाम्ना ख्यातो जातः कविः असौ।

एकदा तमसा नद्याः तीरे विद्यमानेन व्याधेन विध्यम् एकं काममोहितं क्रौञ्चखगम् अपश्यत्। तस्य सहचरस्य वियोगेन व्याकुलायाः क्रौञ्च्याः उच्चैः करुणं क्रन्दनम् अश्रृणोत्। तस्याः दयनीयां दशां विलोक्य द्रवितहृदयस्य ऋषेः मुखात् एकः श्लोकः निरगच्छत्।

**मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अयमेव श्लोकः लौकिकसंस्कृतसाहित्यस्य आदिश्लोकः, कविः च आदिकविः जातः। ब्रह्मणः आदेशेन एव सः कविः आदर्शपुरुषस्य रामस्य रामायणकथाम् अलिखत्। इयं कथा अतीव रमणीया अस्ति अतः उच्यते "रम्या रामायणी कथा"

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| कमण्डलुः | जलपात्रं | कमण्डल |
| नामधेयः | नामकः | नामवाला |
| पापकर्मणि | अशुभकार्ये | पाप कर्म में |
| कुटुम्बजनाः | परिवारजनाः | परिवार के लोग |
| व्याधः | आखेटकः | शिकारी |
| वल्मीकः | पिपीलिकाविवरः | बामी, बम्बोट |
| प्राप्नुहि | लभस्व | प्राप्त करो |
| अमारयः | मारितवान् | मार दिया। |
| ख्यातनामा | प्रसिद्धः | प्रसिद्ध |
| दस्युः | लुण्ठाकः | डाकू |
| रम्या | रमणीया | सुन्दर |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

युष्माकम्, कमण्डलुः, ममाधिकारः, ख्यातनामा, दस्युः,
प्रवेष्टुम्, पुत्रादीन्, व्याधेन, विध्यम्, त्वमगमः

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) सप्त ऋषयः कुत्र गच्छन्ति स्म ?
(ख) रत्नाकरः कुत्र गत्वा कुटुम्बजनान् अपृच्छन् ?
(ग) स स्वमस्तकं कुत्र अनमत् ?
(घ) वाल्मीकिः तमसातीरे केन विध्यं खगम् अपश्यत् ?
(ङ) रामायणकथा कीदृशी अस्ति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**३. रेखाङ्कितानि पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) इदं श्रुत्वा रत्नाकरः स्तब्धः अभवत्।

(ख) स आगत्य ऋषीणां चरणेषु समस्तकम् अनमत्।

(ग) ऋषेः मुखात् श्लोकः निरगच्छत्।

(घ) इयं कथा रमणीया अस्ति।

(ङ) महाकवेः ख्यातिः कुत्र प्रसृता अभवत्।

**४. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत –**

| रत्नाकरः, श्लोकः, कर्णपथे, सप्त, वाल्मीकिः |
|---|

(क) ऋषीणां ............................ भयङ्करः ध्वनिः पतितः।

(ख) वाल्मीकेः पूर्वनाम ................................. आसीत्।

(ग) ........................................ ऋषयः वने अगच्छन्।

(घ) वाल्मीकेः मुखात् ................................... निर्गतः।

(ङ) रामायणस्य रचनाकारः ............................... अस्ति।

**५. अधोलिखितेषु पदेषु प्रयुक्तम् उपसर्गं लिखत –**

**यथा**– आगत्य आ

(क) वियोगेन ---------------

(ख) आरभत ---------------

(ग) विलोक्य ---------------

(घ) अनुवादः ---------------

(ङ) प्रतिकारः ---------------



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




६. **सुसङ्गतानि पदानि मेलयत –**

| | | |
|---|---|---|
| (क) | कालिदासः | योगसूत्रम् |
| (ख) | वेदव्यासः | अष्टाध्यायी |
| (ग) | माघः | अर्थशास्त्रम् |
| (घ) | पतञ्जलिः | रघुवंशम् |
| (ङ) | चाणक्यः | महाभारतम् |
| (च) | पाणिनिः | शिशुपालवधम् |

७. **( क ) सप्तमीविभक्तेः रूपाणि लिखत –**

| | | | | |
|---|---|---|---|---|
| **यथा** – | कोषः | कोषे | नगरम् | नगरे |
| (क) | हस्तः | ------- | (ङ) द्वारम् | ------- |
| (ख) | देवालयः | ------- | (च) पुस्तकम् | ------- |
| (ग) | घटः | ------- | (छ) अक्षरम् | ------- |
| (घ) | श्लोकः | ------- | (ज) पत्रम् | ------- |

**( ख ) चित्रं दृष्ट्वा सप्तमीविभक्तेः रूपाणि जानीत रिक्तस्थानानि च पूरयत –**

| वस्त्राणि | कपाटिका | वस्त्राणि कपाटिकायाम् सन्ति |
|---|---|---|
|  |  |  |

| | | |
|---|---|---|
| **यथा**– | कपाटिका | कपाटिकायाम् |
| (क) | शाखा | -------- |
| (ख) | वाटिका | -------- |
| (ग) | माला | -------- |
| (घ) | पाकशाला | -------- |
| (ङ) | कक्षा | -------- |





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**(ग) चित्रं दृष्ट्वा सप्तमीविभक्तेः रूपाणि जानीत रिक्तस्थानानि च पूरयत –**

| मकरः | नदी | मकरः नद्याम् अस्ति |
|---|---|---|
|  |  |  |

यथा– नदी — नद्याम्

(क) कूपी --------

(ख) देवी --------

(ग) दूरवाणी --------

(घ) जननी --------

(ङ) सरस्वती --------

**८. रेखाङ्कितपदे सप्तमीविभक्तिं प्रयुज्य वाक्यनिर्माणं कुरुत –**

| | | | |
|---|---|---|---|
| यथा – | लेखनी | हस्तः | लेखनी हस्ते अस्ति। |
| (क) | दुग्धं | चषकः | -------- |
| (ख) | चिकित्सालयः | ग्रामः | -------- |
| (ग) | पक्षी | शाखा | -------- |
| (घ) | उत्तरम् | अभ्यासपुस्तिका | -------- |
| (ङ) | तैलम् | कूपी | -------- |
| (च) | पूनः पूरणी | लेखनी | -------- |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



९. सप्तमीविभक्तेः द्विवचने बहुवचने च रूपाणि लिखत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा - | कूपे | कूपयोः | कूपेषु |
| (क) | सोपाने | ------ | ------ |
| (ख) | करवस्त्रे | ------ | ------ |
| (ग) | कारयाने | ------ | ------ |
| (घ) | मापिकायाम् | मापिकयोः | मापिकासु |
| (ङ) | मालायाम् | ------ | ------ |
| (च) | लेखन्याम् | ------ | ------ |

१०. रेखाङ्कितपदानां द्विवचने बहुवचने च प्रयोगं कृत्वा वाक्यानि रचयत -

| | | | |
|---|---|---|---|
| यथा - | दुग्धं चषके अस्ति। | दुग्धं चषकयोः अस्ति। | दुग्धं चषकेषु अस्ति। |
| (क) | पुष्पाणि उद्याने सन्ति। | ---- ---- ---- | ---- ---- ---- |
| (ख) | मन्दिरं ग्रामे अस्ति। | ---- ---- ---- | ---- ---- ---- |
| (ग) | लताः वाटिकायां सन्ति। | ---- ---- ---- | ---- ---- ---- |
| (घ) | वानराः शाखायां सन्ति। | ---- ---- ---- | ---- ---- ---- |
| (ङ) | मकराः नद्यां सन्ति। | ---- ---- ---- | ---- ---- ---- |

११. उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत -

यथा - नौका जले विहरति। (जलम्)

(क) ब्रह्ममन्दिरं ........................................ अस्ति। (पुष्करम्)

(ख) छात्राः विद्यालयस्य ............................ क्रीडन्ति। (क्रीडाङ्गणम्)

(ग) खगाः .......................................... कूजन्ति। (शाखा)

(घ) माता ...................................... पाकं करोति। (पाकशाला)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः

१. **रामायणस्य परिचयः** – महर्षिः वाल्मीकिः एव आदिकाव्यं रामायणं रचितवान्। एतत् संस्कृतेन लिखितम् अस्ति। अत्र मर्यादापुरुषोत्तमस्य रामस्य कथा वर्णिता अस्ति। एतस्य कथा सप्तसु काण्डेषु विभक्ता अस्ति। तेषां नामानि सन्ति –

१. बालकाण्डम्
२. अयोध्याकाण्डम्
३. किष्किन्धाकाण्डम्
४. अरण्यकाण्डम्
५. सुन्दरकाण्डम्
६. युद्धकाण्डम्
७. उत्तरकाण्डम्।

अत्र चतुर्विंशतिसहस्रं (२४०००) पद्यानि सन्ति अतः एतत् "चतुर्विंशतिसाहस्री" अपि उच्यते। अस्य कथाम् आश्रित्य विभिन्नासु भाषासु अनेकग्रन्थाः रचिताः सन्ति। यथा –

| | |
|---|---|
| तमिलभाषायाम् | कम्बरामायणम् |
| अवधिभाषायाम् | रामचरितमानसम् |

२. **सर्वनाम शब्दानां सप्तमीविभक्तेः रूपाणि जानीम–**

| | | | | |
|---|---|---|---|---|
| पुँल्लिङ्गे नपुंसकल्लिङ्गे च | तत् | तस्मिन् | तयोः | तेषु |
| | एतत् | एतस्मिन् | एतयोः | एतेषु |
| | किम् | कस्मिन् | कयोः | केषु |
| स्त्रीलिङ्गे | तत् | तस्याम् | तयोः | तासु |
| | एतत् | एतस्याम् | एतयोः | एतासु |
| | किम् | कस्याम् | कयोः | कासु |
| त्रिषुलिङ्गेषु | अस्मद् | मयि | आवयोः | अस्मासु |
| | युष्मद् | त्वयि | युवयोः | युष्मासु |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पञ्चमः पाठः ५


# नित्यं कर्तव्यम्

## (क्त्वा ल्यप् च)

(पाठेऽस्मिन् बालकस्य नित्यक्रियायाः वर्णनमस्ति। सः प्रतिदिनं किं-किं करोति? आगच्छन्तु वयं गीतमाध्यमेन पठामः।)







प्रातः काले ईशं स्मृत्वा, पितरौ प्रणमामि।
नित्यं कर्म च कृत्वोद्यानं, गत्वा विचरामि ।।1।।

स्नानात् पूर्वं प्राणायामं, तदनु व्यायामम्।
वृष्टिर्भवतु वा झञ्झावातो, हिमं पतेत् कामम् ।।2।।

गृहमागत्य दुग्धं पीत्वा, पठामि निजपाठम्।
ततो भोजनं करोमि नित्यं, षड्रससंयुक्तम् ।।3।।


विद्यालये च गुरुवर्याणां, करोमि सम्मानम्।
श्रद्धायुक्तो भूत्वैवाहम्, अर्जयामि ज्ञानम् ।।4।।


सायङ्काले क्रीडाक्षेत्रे, गत्वा क्रीडामि।
देवदर्शनं ततो भोजनं, पाठं स्मरामि ।।5।।

शयनात् पूर्वं राष्ट्रचिन्तनं, नित्यं कर्तव्यम्।
भारतमातुः दिव्यमन्दिरं, भवतु पुनः भव्यम् ।।6।।

( परमानन्द शर्मा ''प्रमोदः'' )










Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| ईशम् | देवम् | ईश्वर को |
| स्मृत्वा | स्मरणं कृत्वा | स्मरण करके |
| पितरौ | जनकं जननीं च | माता–पिता को |
| उद्यानम् | वाटिका | बगीचा |
| तदनु | तत्पश्चात् | इसके बाद |
| झञ्झावातः | चक्रवातः | तूफान |
| कामम् | यद्यपि | भले हि |
| आगत्य | आगमनं कृत्वा | आकर |
| नित्यम् | सदैव | सर्वदा |
| भारतमातुः | भारतजनन्याः | भारत माता का |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

प्रातःकाले, स्मृत्वा, कृत्वोद्यानम्, व्यायामम्, झञ्झावातः,
गृहमागत्य, भूत्वैवाहम्, देवदर्शनम्, भव्यम् सायङ्काले

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) बालः कुत्र गत्वा विचरति ?

(ख) सः प्रातःकाले कं स्मरति ?

(ग) सः गृहम् आगत्य किं पिबति ?

(घ) आदर्शबालः केषां सम्मानं करोति ?

(ङ) बालाः कुत्र क्रीडन्ति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



३. **कोष्ठकात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत -**

(क) अहम् ------------- पूर्वं व्यायामं करोमि। (भोजनात्/स्नानात्/अध्ययनात्)

(ख) अहं गृहम् आगत्य दुग्धं पीत्वा ------ पठामि। (पत्रिकाम्/दैनन्दिनम्/स्वपाठम्)

(ग) छात्रः विद्यालये ------------- अर्जयति। (धनम्/बुद्धिम्/ज्ञानम्)

(घ) नित्यं ----------- कर्तव्यम्। (गृहचिन्तनम्/राष्ट्रचिन्तनम्/स्वचिन्तनम्)

४. **निम्नाङ्कितपदानां संयोजनं कुरुत -**

| | (क) | | (ख) |
|---|---|---|---|
| (क) | पितरौ | - | पतेत् |
| (ख) | वृष्टिः | - | करोमि |
| (ग) | निजपाठम् | - | अर्जयामि |
| (घ) | हिमम् | - | प्रणमामि |
| (ङ) | सम्मानम् | - | भवतु |
| (च) | ज्ञानम् | - | पठामि |

५. **निम्नलिखितपदेषु सन्धिं कृत्वा लिखत -**

(क) कृत्वा + उद्यानम् ------------

(ख) वृष्टिः + भवतु ------------

(ग) भूत्वा + एव + अहम् ------------

(घ) गृहम् + आगत्य ------------

६. **निम्नलिखितपदानां विभक्तिं वचनं च लिखत -**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | प्रातःकाले | ---------- | ------------ |
| (ख) | व्यायामम् | ---------- | ------------ |
| (ग) | भारतमातुः | ---------- | ------------ |
| (घ) | शयनात् | ---------- | ------------ |
| (ङ) | क्रीडाक्षेत्रे | ---------- | ------------ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## ७. वाक्यानि संयोज्य लिखत -

**यथा** - रमा उद्यानं **गच्छति**। पाठं पठति। रमा उद्यानं **गत्वा** पाठं पठति।

(क) भगिनी पाठं **पठति**। गृहकार्यं करोति। ------------------।

(ख) माता पूजां **करोति**। कार्यालयं गच्छति। ------------------।

(ग) पर्यटकः हवामहलं **पश्यति**। आनन्दितः भवति। ------------------।

(घ) अहं संस्कृतवार्तां **शृणोमि**। ज्ञानं वर्धयामि। ------------------।

(ङ) मृगः नदीं **गच्छति**। जलं पिबति। ------------------।

## ८. रेखाङ्कितपदे ल्यप् प्रत्ययं प्रयुज्य वाक्यानि लिखत -

(क) बालकः उत्तिष्ठति धावति। ------------------।

(ख) वयं देवं नमस्कुर्मः कार्यारम्भं कुर्मः। ------------------।

(ग) वयं सम्मिलामः वार्तालापं कुर्मः। ------------------।

(घ) गीता पाठं लिखति पठति। ------------------।

## योग्यता-विस्तारः

### १. एतदपि जानीत -

। यदा धातोः पूर्वम् उपसर्गः शब्दः वा भवति तदा क्त्वा स्थाने ल्यप् भवति।

| | | |
|---|---|---|
| प्रक्षालयति | प्रक्षाल्य | प्र + क्षाल् + ल्यप् |
| उत्तिष्ठति | उत्थाय | उत् + स्था + ल्यप् |
| उपविशति | उपविश्य | उप + विश् + ल्यप् |

। अत्र प्र , उत् , उप इति उपसर्गाः सन्ति।

| | | |
|---|---|---|
| नमस्करोति | नमस्कृत्य | नमः + कृ+ ल्यप् |
| अलङ्करोति | अलङ् कृत्य | अलम् + कृ + ल्यप् |

। अत्र नमः, अलम् द्वौ अपि शब्दौ स्तः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



२. क्त्वा ल्यप् प्रत्ययोः रूपाणाम् अभ्यासं कुरूत -


यथा - बालिका विद्यालयं गच्छति।



बालिका पाठं पठति।



बालिका विद्यालयं गत्वा पाठं पठति।



| वर्तमानकालिकरूपम् | क्त्वा-प्रत्ययान्तरूपम् | प्रकृतिः + प्रत्ययः |
|---|---|---|
| पठति | पठित्वा | पठ् + क्त्वा |
| लिखति | लिखित्वा | लिख् + क्त्वा |
| खादति | खादित्वा | खाद् + क्त्वा |
| पतति | पतित्वा | पत् + क्त्वा |
| क्रीडति | क्रीडित्वा | क्रीड् + क्त्वा |
| मिलति | मिलित्वा | मिल् + क्त्वा |
| नयति | नीत्वा | नी + क्त्वा |
| भवति | भूत्वा | भू + क्त्वा |
| करोति | कृत्वा | कृ + क्त्वा |
| चिनोति | चित्वा | चि + क्त्वा |
| श‍ृणोति | श्रुत्वा | श्रु+ क्त्वा |
| पश्यति | दृष्ट्वा | दृश्+ क्त्वा |
| पिबति | पीत्वा | पा+ क्त्वा |
| ददाति | दत्त्वा | दा + क्त्वा |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



३.




अहं प्रभाते उतिष्ठामि
माता पितरौ प्रणमामि।
देवान् भक्तवरेण्यान् नत्वा
पठने मतिं विधास्यामि ।।१।।

विना विलम्बं शाला गच्छन्
पाठ्यांशान् अवगच्छामि।
सर्वान् विषयान् सम्यगधीत्य
बुद्धि विशदतां प्राप्नोमि ।।२।।

शिष्टाचारान् साधुविचारान्
बुद्धिकरान् आकलयामि।
विद्याभ्यासाचारविचारैः
सर्वश्रेष्ठतां विन्दामि ।।३।।

(श्री जनार्दन हेगडे)

**अध्यापकाय निर्देशः –**

। शिक्षकः कक्षायाम् अस्य गीतस्य अभ्यासं कारयेत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

षष्ठः पाठः ६

# स्वास्थ्यम्

(ईकारान्तःस्त्रीलिङ्गः तृतीयाविभक्तिः च)

(स्वस्थशरीरे स्वस्थं मनः वसति। अतः शरीरस्य आरोग्यम् महदावश्यकम् एव। पाठेऽस्मिन् वयम् आरोग्यरक्षणस्य उपायान् ज्ञास्यामः।)



**अध्यापिका** – सरले! ह्यः त्वं कक्षायां किमर्थम् न उपस्थितवती?

**सरला** – महोदये! रात्रौ महती अर्धशिरोवेदना आसीत्।

**अध्यापिका** – प्रथमवारम् एव जाता वा?

**सरला** – नहि महोदये! वर्षत्रयाद् एषा पीडा अस्ति पूर्वम् सह्या आसीत् किन्तु इदानीं तु असह्या।



**अध्यापिका** – अतीव चिन्तनीयमिदम्। वैद्येन सह परामृष्टवती किम्?

**सरला** – आम्। परामृष्टवती किन्तु वैद्येन दत्तम् औषधम् खादामि तदा पीडा शाम्यति अनन्तरम् तु पुनः वर्धते।



**अध्यापिका** – यदा औषधसेवनं रोगान् न उन्मूलयति, तदा योगोपचारः कर्तव्यः। योगकक्षां गत्वा योगशिक्षिकया मार्गदर्शनं स्वीकुरु। सा चिकित्सां करिष्यति।

**सरला** – योगोपचारः कथं भवति।

**अध्यापिका** – विविधैः आसनैः प्राणायामेन च। यथा पद्मासनम्, भ्रामरी, अनुलोम-विलोमः, कपालभातिः इत्यादीनि।

**सरला** – तर्हि श्वः रविवासरः। अहं श्वः एव योगशिक्षिकया सह मेलिष्यामि। (रविवासरे सरला योगशिक्षिकासमीपम् गच्छति)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com






**सरला** – नमस्ते भगवति! अहं सरला! मम शिक्षिका देवी रमा भवत्या सह मेलितुं मां प्रेरितवती। मम शिरसि अर्धभागे वेदना भवति।

**योगशिक्षिका** – आगच्छ इदानीं योगकक्षा प्रचलति, त्वम् अपि भागं स्वीकुरु?


**सरला** – आम् आगच्छामि।



**योगशिक्षिका** – आदौ सिद्धासनं, पद्मासनं च कारयिष्यामि? एतेषाम् अभ्यासेन एकस्थितौ उपवेशनं स्थिरं भवति। तदा अध्ययने, कार्ये, प्राणायामे च काठिन्यं न स्यात्।


**सरला** – कः एषः प्राणायामः? किम् एतद् अपि आसनम्?

**योगशिक्षिका** – न प्राणायामेन श्वासोच्छ्वसनं नियन्त्रितं भवति। अनेन हृदयरोगे, नासिकारोगे, श्वासरोगे च लाभाः भवन्ति।



**सरला** – योगकक्षा किमर्थं प्रातरेव आयोज्यते?

**योगशिक्षिका** – प्रातःकाले सूर्यः शान्तः, वायुः शीतलः,निर्मलः च भवति। प्रातः कालः सुखकरः भवति। योगः प्राकृतिकः उपचारः। अतः प्रातः कालः योगाय उचितः।



**सरला** – तर्हि अहं योगाभ्यासाय प्रतिदिनम् आगमिष्यामि।

**योगशिक्षिका** – पुनरागमनाय गच्छतु भवती।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| ह्यः | गतदिनम् | बीता हुआ कल |
| श्वः | आगामिदिनम् | आने वाला कल |
| वैद्यः | चिकित्सकः | चिकित्सक |
| अभिमतम् | संस्तुतिः | सलाह |
| कारयिष्यामि | कर्तुं प्रेरयिष्यामि | कराऊँगी/कराऊँगा |
| उन्मूलयति | नाशयति | मिटाती है |
| क्षुधाभावः | बुभुक्षायाः अभावः | भूख न लगना |
| सम्यक् | साधु | ठीक |
| स्थगिते | विरामे | बन्द करने पर |
| चिकित्सा | उपचारः | उपचार |
| सुकरम् | सरलम् | सरल |
| प्रातरेव | प्रातःकाले एव | सवेरे |
| वैद्येन | चिकित्सकेन | चिकित्सक के द्वारा |
| शिरसि | मस्तके | सिर में |
| विविधैः | अनेकैः | अनेक प्रकार के |

## अभ्यासः

१. **निम्नपदानाम् उच्चारणं कुरुत -**

ह्यः, क्षुधाभावः, उदरपीडा, मार्गदर्शनम्, स्वीकुरु, सिद्धासनम्, मनोनिग्रहार्थम्।

२. **निम्नलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत -**

(क) सरलायाःकृते औषधयोजनां कः अकरोत्?

(ख) शरीरं चित्तं च केन स्वस्थं भवति?

(ग) कः कालः योगाय उचितः भवति?

(घ) श्वासोच्छ्वसनं केन नियन्त्रितं भवति?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**३. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –**

| प्राकृतिकः, योगस्य, मार्गदर्शनम्, पीड़ा |
|---|

(क) स्थगिते औषधे पुनः .................. प्रादुर्भवति।

(ख) योगशिक्षिकायाः ......................स्वीकुरु।

(ग) ........................... अभ्यासेन अनेके लाभाः सम्भवन्ति।

(घ) योगः ..................................... उपचारः।

**४. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) <u>योगाभ्यासेन</u> कार्ये कौशलं जायते।

(ख) आसनानि <u>सन्धिरोगान्</u> उन्मूलयन्ति।

(ग) अहं श्वः <u>योगशिक्षिकया</u> सह मेलिस्यामि।

(घ) सर्वं <u>गुरोः</u> निर्देशने करणीयम्।

**५. विलोमपदानि योजयत –**

| | |
|---|---|
| (क) उपस्थिताः | सायङ्कालः |
| (ख) स्वस्थः | दुष्करं |
| (ग) सुकरं | हानयः |
| (घ) लाभाः | अस्वस्थः |
| (ङ) प्रातःकालः | अनुपस्थिताः |

**६. निम्नपदानि आधारीकृत्य वाक्यनिर्माणं कुरुत –**

वैद्यः, औषधिः, रोगान्, सुकरं, अपश्यत्, कक्षायाम्

**७. रेखाङ्कितपदानि आधृत्य रूपाणि परिवर्तयत –**

बालकः<u>कन्दुकेन</u> क्रीडति   बालिका <u>द्विचक्रिकया</u> गच्छति   नापितः <u>कर्तर्या</u> केशान् कर्तयति

**यथा – चमसः – चमसेन     शाटिका – शाटिकया     लेखनी – लेखन्या**

| | | |
|---|---|---|
| (क) चषकः – .................. | (ङ) माला – .................. | (झ) द्रोणी– .................. |
| (ख) दर्पणः – .................. | (च) शाखा – .................. | (ञ) नगरी– .................. |
| (ग) दीपः – .................. | (छ) लता – .................. | (ट) नर्तकी –.................. |
| (घ) जलम् – .................. | (ज) स्थालिका–.................. | (ठ) नारी – .................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



८. कोष्ठके प्रदत्तशब्दस्य उचितरूपेण वाक्यं पूरयत –

(क) वृद्धः.................................... गच्छति। (दण्डः)

(ख) .................................... प्रकाशः भवति। (गोलदीपः)

(ग) भगिनी.............................. शाकं कर्तयति। (छुरिका)

(घ) लेखिका...................................लिखति। (लेखनी)

(ङ) अधिकारी...................... कार्यालयं गच्छति। (कारयानम्)

९. तृतीयाविभक्तेः द्विवचने बहुवचने च रूपाणि परिवर्तयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | हस्तेन | हस्ताभ्याम् | हस्तैः |
| (क) | जनेन | ................ | ................ |
| (ख) | वृक्षेण | ................ | ................ |
| (ग) | पत्रेण | ................ | ................ |
| (घ) | फलेन | ................ | ................ |
| (ङ) | दर्पणेन | ................ | ................ |
| (च) | दर्पणेन | ................ | ................ |

१०. अधोलिखितानि रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | गौर्या | गौरीभ्याम् | गौरीभिः |
| (क) | लेखन्या | ................ | ................ |
| (ख) | नद्या | ................ | ................ |
| (ग) | पार्वत्या | ................ | ................ |
| (घ) | नार्या | ................ | ................ |
| (ङ) | सख्या | ................ | ................ |
| (च) | माधव्या | ................ | ................ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः

### १. योगः –

* योगविद्यायाः प्रवर्तकः महर्षिपतञ्जलिः आसीत्। अनेन मुनिना शरीरार्थम् आयुर्वेदस्य, वाणीशुद्ध्यर्थं व्याकरणस्य, मनोनिग्रहार्थं च योगशास्त्रस्य ग्रन्थाः लिखिताः।
* योगस्य अष्टाङ्गानि भवन्ति। यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानं, समाधिः च।
* योगस्य जीवने महत्त्वं विचारयन् संयुक्तराष्ट्रसङ्घेन जूनमासस्य एकविंशत्यां दिनाङ्के अन्ताराष्ट्रियः 'योगदिवसः' उद्घोषितः।

### २. भोजने ध्यातव्यम् –


शुद्धं सात्विकं च भोजनम् एव करणीयम्। श्रीकृष्णोऽपि श्रीमद्भगवद्गीतायां लिखति–

**यातयामं गतरसं पूति पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥**

रात्रिकालस्य भोजनं, रसरहितम्, दुर्गन्धयुक्तम्, अन्यद्वारा आस्वादितं, अपवित्रं च तमोप्रवृत्तिदायकं भवति। यथा पिज्जा बर्गर इति व्यवहारे प्रयुज्यं भोजनं हानिकारकम् एव।

### ३. एतानि जानीत: –

स्वास्थ्यवर्धकानि फलानि शाकानि च –



| | | | |
|---|---|---|---|
| कदली फलम् | सेवम् | आम्रम् | मधुकर्कटी |
| वृन्ताकः | दाडिमम् | पुष्पशाकम् | नारिकेलफलम् |
| दाक्षाफलम् | कूष्माण्डकम् | पलाण्डु | आर्द्रकम् |
| नारङ्गम् | आलुकम् | कारवेल्लः | मूलकम् |
| गृञ्जनकम् | जम्भीरः | भिण्डीकम् | रक्ताङ्गम् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सप्तमः पाठः ७

# धन्योऽयं दानवीरः

( २१-५० संख्या , लृट्लकारः )



को न जानाति प्रातः स्मरणीयस्य मेदपाटवीरस्य महाराणाप्रतापस्य नाम। अस्य महावीरस्य जीवनलक्ष्यं मातृभूम्याः मेदपाटधरायाः स्वतन्त्रता आसीत्। स्वातन्त्र्यप्राप्त्यर्थं महाराणाप्रतापः तस्य परिवारजनाश्च वने अनेकानि कष्टानि असहन्त। वनप्रान्ते भ्रमन् सः अनेकवारं आहाररहितं जीवनमपि यापितवान् अन्नाभावे सः घासरोटिकामपि खादितवान् । परं मेदपाटवीरः कदापि स्वलक्ष्यात् विचलितः नाभवत्।

धनाभावे सेनासङ्घटनमपि दुष्करम् अभवत्। तदा भामाशाहः राणाप्रतापस्य समक्षमागतः। भामाशाहः स्वस्य सम्पूर्णजीवनस्य परिश्रमेणार्जितं सञ्चितं च धनं प्रताप-पादयोः समर्पितवान्। प्रतापः विस्मितोऽभवत्। भामाशाहः अवदत् - "महाराज! द्रव्यमिदं तु तुभ्यम् अस्माकं समाजाय, अस्माकं देशाय एव यच्छामि। भवान् एतं धनराशिं स्वीकृत्य देशोद्धारं करोतु।"

प्रतापः जानाति स्म यत् भामाशाहः पूर्वमेव अर्बुदपर्वते जैनमन्दिरं निर्मातुं सङ्कल्पितवान् धनमिदं तदर्थमेव एव सुरक्षितं स्थापितम्। अत एव प्रतापः अवदत् "देशभक्तभामाशाह! तव मन्दिरनिर्माणस्य किं भविष्यति?" भामाशाहस्य गर्वपूर्णम् उत्तरम् आसीत् "महाराज! राष्ट्रमेव न रक्षितं तदा किं तस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



मन्दिरस्य निर्माणेन ? अस्तु , भवान् स्वदेशरक्षायै स्वीकरोतु इदं द्रव्यम् ।''

स्वदेशरक्षार्थं दत्तोऽयं धनराशिः पञ्चाशते सहस्राय सैनिकेभ्यः विंशतिं वर्षाणि यावत् वेतनवस्त्रशस्त्रेभ्यः च पर्याप्तः आसीत् । वीरवरेण प्रतापेन प्रचुरेण तेन धनेन शस्त्राणि सङ्गृह्य स्वजन्मभूमिः मेदपाटधरा शत्रुभ्यः विमुक्ता । एतस्याः घटनायाः कालाद् एव भामाशाहः दानदातॄणां दानमूर्तेः पर्यायरूपेण प्रसिद्धः अभवत् । भामाशाहेन एतस्मै पुनीतकार्याय धनराशिं दत्त्वा स्वदेशस्य स्वस्य च यशः सर्वकालाय एव अक्षुण्णं कृतम् ।

धन्योऽयं देशभक्तः, दानवीरः भामाशाहः ।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सङ्कल्पितवान् | निश्चितवान् | निश्चय किया |
| दुष्करम् | कठिनम् | कठिन |
| देशोद्धारम् | देशस्य उद्धारम् | देश का उद्धार |
| सङ्गृह्यम् | एकत्रितम् | इकट्ठा |
| अक्षुण्णम् | स्थायि | अमर |

## अभ्यासः

१. **निम्नपदानाम् उच्चारणं कुरुत –**

इतस्ततः, परिश्रमेणार्जितम्, देशोद्धारम्, गर्वपूर्णमुत्तरम्, सङ्गृह्य

२. **एकवाक्येन उत्तरत –**

(क) महाराणा प्रतापस्य जीवनस्य लक्ष्यं किम् आसीत् ?

(ख) महाराणाप्रतापः भामाशाहस्य केन कार्येण विस्मितः अभवत् ?

(ग) स्वलक्ष्यात् कः विचलितः न अभवत् ?

(घ) भामाशाहेन स्वसम्पत्तिः किमर्थं दत्ता ?

(ङ) दानमूर्तेः पर्यायरूपेण कः प्रसिद्धोऽभवत् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



३. **रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –**

(क) स्वतन्त्रताप्राप्त्यर्थं महाराणाप्रतापः अनेकानि कष्टानि असहत्।

(ख) भामाशाहः राणाप्रतापस्य समक्षम् आगतः ।

(ग) प्रतापः विस्मितोऽभवत्।

(घ) धनमिदं तदर्थम् एव सुरक्षितं स्थापितम्।

(ङ) भामाशाहस्य गर्वपूर्णम् उत्तरम् आसीत्।

(च) प्रतापेन स्वजन्मभूमिः मेदपाटधरा शत्रुभ्यः विमुक्ता।

४. **समानार्थकानि पदानि मेलयत –**

| | |
|---|---|
| (क) वनम् | रिपुः |
| (ख) धनम् | काननम् |
| (ग) दुष्करम् | द्रव्यम् |
| (घ) पादयोः | पृथिवी |
| (ङ) धरा | चरणयोः |
| (च) शत्रुः | कठिनम् |

५. **उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत –**

(क) वनप्रान्ते भ्रमन् सः अनेकवारम् आहाररहितं जीवनमपि यापितवान्। [ ]

(ख) महाराणाप्रतापः घासरोटिकाम् अपि खादितवान् । [ ]

(ग) प्रतापः न जानाति स्म यत् भामाशाहः पूर्वमेव अर्बुदपर्वते जैनमन्दिरं निर्मातुं सङ्कल्पितवान्। [ ]

(घ) भामाशाहस्य नाम दानदातॄणां मध्ये प्रसिद्धम् अस्ति। [ ]

(ङ) भामाशाहेन राष्ट्ररक्षायै स्वसम्पत्तिः न समर्पिता। [ ]

६. **भिन्नप्रकृतिकं पदं चित्वा लिखत –**

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति ..............................

(ख) चटकः, सेवकः, शिक्षकः, लेखिका, क्रीडकः ..............................

(ग) व्याघ्रः, भल्लूकः, गजः, कपोतः, वृषभः ..............................

(घ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा ..............................

(ङ) आम्रः, दाडिमः, कदली, निम्बः, मल्लिका ..............................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



७. **निम्नलिखितवाक्यानि भविष्यत्काले परिवर्त्य लिखत -**

| | | |
|---|---|---|
| यथा - | रोहितः पाठं पठति | रोहितः पाठं पठिष्यति |
| (क) | वानरः फलं खादति | ............................... |
| (ख) | बालकः क्रीडति | ............................... |
| (ग) | मित्रं पत्रं लिखति | ............................... |
| (घ) | आकाशात् जलं पतति | ............................... |
| (ङ) | अश्वः मार्गे धावति | ............................... |

## योग्यता-विस्तारः

१. मारवाडस्य रावः चन्द्रसेनः मारवाडस्य प्रतापः इति नाम्ना ज्ञायते। एषोऽपि महाराणाप्रताप इव यवनानाम् दासतां न अङ्गीकृतवान्। अस्य जन्म जोधपुरस्य राजधान्यां मण्डोरे अभवत्। प्रतापस्य अग्रगामी,



विस्मृतः राजा इति नामद्वयेन एषः ज्ञायते। अकबरः रावचन्द्रसेनं मारवाडात् नागौरराज-सभायाम् आहूतवान्। परं तत्र एषः महान् आत्मा अकबरस्य अधीनतां तिरस्कृत्य स्वराज्यं मारवाडम् आगच्छत्। अकबरः हुसैनकुलीखानस्य नेतृत्वे रावचन्द्रसेनम् अनुसरतः सैनिकान् प्रेषितवान् रावचन्द्रसेनः अनुगच्छन्तीं सेनां अभिज्ञाय मारवाडात् दूरं भाद्राजूणस्य पर्वतमार्गेण जालौरं प्राप्य सिवाणदुर्गे शरणं प्राप्तवान्। अस्य मृत्युः सहारणपर्वतशृङ्खलासु जाता। एषः बहुषु महत्त्वपूर्णेषु युद्धेषु अयुध्यत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



२. **संस्कृतेसंख्या लेखनक्रीडाभ्यासं कुरुत -**

। शिक्षकः कक्षां गणद्वये विभक्तं कुर्यात्। ततः परं द्वाभ्यां गणाभ्याम् एकैकं छात्रम् आहूय स्वयं द्वारा शब्देन उक्तसंख्या श्यामपटे अङ्केन लेखितुं वदेत्। यः छात्रः पूर्वं लिखेत् तस्मै वर्धापनं प्रदाय तस्य उत्साहवर्धनं कुर्यात् एव प्रतिस्पर्धारूपेण क्रीडा कारणीया।




३. **संस्कृतेसंख्यानाम् उच्चारणं कृत्वा संख्यान्वेषणक्रीडा क्रीडामः -**

| | | | | | |
|---|---|---|---|---|---|
| २१ | एकविंशतिः | ३१ | एकत्रिंशत् | ४१ | एकचत्वारिंशत् |
| २२ | द्वाविंशतिः | ३२ | द्वात्रिंशत् | ४२ | द्विचत्वारिंशत् |
| २३ | त्रयोविंशतिः | ३३ | त्रयस्त्रिंशत् | ४३ | त्रिचत्वारिंशत् |
| २४ | चतुर्विंशतिः | ३४ | चतुस्त्रिंशत् | ४४ | चतुश्चत्वारिंशत् |
| २५ | पञ्चविंशतिः | ३५ | पञ्चत्रिंशत् | ४५ | पञ्चचत्वारिंशत् |
| २६ | षड्विंशतिः | ३६ | षट्त्रिंशत् | ४६ | षट्चत्वारिंशत् |
| २७ | सप्तविंशतिः | ३७ | सप्तत्रिंशत् | ४७ | सप्तचत्वारिंशत् |
| २८ | अष्टाविंशतिः | ३८ | अष्टात्रिंशत् | ४८ | अष्टचत्वारिंशत् |
| २९ | नवविंशतिः | ३९ | नवत्रिंशत् | ४९ | नवचत्वारिंशत् |
| ३० | त्रिंशत् | ४० | चत्वारिंशत् | ५० | पञ्चाशत् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



। शिक्षकः छात्रम् आहूय शिक्षकद्वारा उक्तसंख्यां श्यामपट्टे अन्वेषणाय वदेत्। छात्रः अन्विष्य प्रदर्शयेत्। एतां क्रीडां स्पर्धारूपेण कारयेत्।




४. **लृट्लकारस्य सामान्यक्रियापदानां पूर्वम् अभ्यासः कृतः। विशिष्टानां क्रियापदानां इदानीम् अभ्यासं कुर्मः-**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

(अस्य अभ्यासस्य द्वारा वयम् अन्यानि अपि क्रियारूपाणि ज्ञास्यामः।)

| लट्लकारः | लृट्लकारः | लट्लकारः | लृट्लकारः |
|---|---|---|---|
| पठति | पठिष्यति | करोति | करिष्यति |
| खादति | खादिष्यति | पश्यति | द्रक्ष्यति |
| विकसति | विकसिष्यति | इच्छति | एषिष्यति |
| स्मरति | स्मरिष्यति | गायति | गास्यति |
| नृत्यति | नर्तिष्यति | जयति | जेष्यति |
| आकर्णयति | आकर्णयिष्यति | उपदिशति | उपदेक्ष्यति |
| चिन्तयति | चिन्तयिष्यति | प्रविशति | प्रवेक्ष्यति |
| तोलयति | तोलयिष्यति | पालयति | पालयिष्यति |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अष्टमः पाठः
८

# आदर्शपरिवारः

(भारतदेशे आदर्शपरिवारस्य महत्ता संसारे अद्वितीया अस्ति। स्वराष्ट्रे संयुक्तपरिवारस्य व्यवस्था अनादिकालात् प्रचलिता अस्ति। भारतीयसंस्कृत्याः अनुसारेण पशुपक्षिणः वृक्षपादपादीन् प्रति आत्मवत् संरक्षणभावः प्रमुखः वर्तते।)



एकस्मिन् ग्रामे विश्वनाथः नामधेयः सज्जनः वसति। तस्य परिवारः संयुक्तपरिवारः अस्ति। तस्य पत्नी गौरी अस्ति। विश्वनाथः षड्त्रिंशद्वर्षीयः तस्य पत्नी गौरी द्वात्रिंशद्वर्षीया चास्ति। विश्वनाथस्य हृदयम् अतीव उदारं गौर्याः स्वभावश्चातीव मृदुलः विद्यते। एतयोः एकः पुत्रः एका च पुत्री स्तः। पुत्रस्य नाम गणेशः पुत्र्याः नाम च गीता अस्ति। गणेशः द्वादशवर्षीयः गीता च अष्टवर्षीया स्तः। गणेशः अष्टमकक्षायां गीता चतुर्थकक्षायां च पठतः। परिवारे पितामहः पितामही, भ्राता, भ्रातृजाया, तस्य पुत्रः पुत्री च निवसन्ति। तस्य परिवारे प्रतिदिनं प्रातः स्मरणम्, भोजनमन्त्रः च भवतः।

**प्रातःस्मरणम्** – कराग्रे वसते लक्ष्मीः, करमध्ये सरस्वती।
करमूले तु गोविन्दः, प्रभाते करदर्शनम्।।

**भोजनमन्त्रम्** – ॐ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।।
ॐ शान्तिः शान्तिः शान्तिः।।

विश्वनाथः कुशलकृषकः अपि अस्ति। तस्य गृहाङ्गणे वृन्दापादपः विकसति। परिवारजनाः तस्य अर्चनं कुर्वन्ति। सः सर्वदा कृषिकर्मणि तत्परः स्वकर्त्तव्यं पालयति। सः परिश्रमं कृत्वा स्वक्षेत्रे पर्याप्तमात्रायां शाकानि फलानि च उत्पादयति। आम्रनिम्बादिवृक्षैः आच्छादितं गृहमत्यन्तं रमणीयं वर्तते। तस्य गृहे एका श्वेतवर्णा धेनुः वर्तते। सा दुग्धं ददाति। तस्याः दुग्धेन निर्मितं दधिघृतयुक्तं भोजनं सर्वे कुर्वन्ति। तस्य गृहे आहारे शाकानां फलानां चाधिक्यं वर्तते। तौ भ्रातृभगिन्यौ यथेच्छं दुग्धं पिबतः। स्वच्छानि वस्त्राणि परिधाय प्रसन्नौ स्वस्थौ तौ मातरं पितरं च प्रणम्य पठनाय स्वविद्यालयं प्रतिगच्छतः।

गृहिणी गौरी स्वस्था आदर्शभूता च अस्ति। सः विश्वनाथः स्वपत्नीं बहु आद्रियते। अनेन कारणेन



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



परस्परं सर्वेषु महती प्रीतिः ऐक्यभावः स्नेहसौहार्द्रपूर्णः च व्यवहारः अस्ति। एतत् सयुंक्तपरिवारे एव सम्भवति। एकः आदर्शपरिवारः आहारस्य वस्त्रस्य गृहस्य च व्यवस्था संयुक्तपरिवारे एवं समुचितरूपेण भवति। अनेनैव समाजस्य राष्ट्रस्य च कल्याणं भवितुम् एतत् संयुक्तपरिवारे एव सम्भवति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| एकस्मिन् ग्रामे | एकग्रामे | एक गांव में |
| वसति | निवसति | रहता है |
| कक्षायाम् | पठनकक्षे | कक्षा में |
| कर्मणि | कार्ये | कर्म में |
| तत्परः | संलग्नः | लगा हुआ |
| तस्य गृहे | तद्भवने | उसके घर में |
| निम्बः | नीम्बस्य वृक्षः | नीम का वृक्ष |
| प्रणम्य | नत्वा | प्रणाम करके |
| पितामही | पितुः माता | दादी |
| भ्राता | अग्रजः | भाई |
| भ्रातृजाया | भ्रातुः पत्नी | भाभी |
| कराग्रे | हस्ताग्रे | हाथ के अग्रभाग में |
| प्रभाते | प्रातःकाले | प्रातःकाल में |
| वृन्दापादपम् | तुलसीपादपम् | तुलसी का पौधा |
| यथेच्छम् | इच्छानुसारम् | इच्छा के अनुसार |
| संयुक्तः | सम्मिलितः | सामूहिक |

## अभ्यासः

१. **निम्नलिखित शब्दानाम् उच्चारणं कुरुत -**

षट्त्रिंशद्वर्षीयः, द्वात्रिंशद्वर्षीया, स्वभावश्चातीव, ब्रह्मार्पणम्,
ब्रह्माग्नौ, आम्रनिम्बादिवृक्षैः सौहार्द्रपूर्णः, ऐक्यभावः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**२. निम्नलिखितप्रश्नान् एकपदेन उत्तरत -**

(क) एकस्मिन् ग्रामे कः वसति ?

(ख) विश्वनाथस्य पत्न्याः किं नाम अस्ति ?

(ग) विश्वनाथः किं कार्यं करोति ?

(घ) विश्वनाथस्य गृहे एका श्वेतवर्णा का वर्तते ?

(ङ) कस्य परिवारः आदर्शः अस्ति ?

**३. निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) संयुक्तपरिवारः कस्य अस्ति ?

(ख) विश्वनाथस्य पुत्रस्य नाम किम् अस्ति ?

(ग) विश्वनाथस्य गृहाङ्गणे कः पादपः अस्ति ?

(घ) विश्वनाथस्य गृहे का धेनुः अस्ति?

(ङ) विश्वनाथः काम् आद्रियते?

**४. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

| अष्टमी, चतुर्थकक्षायाम्, कृषि, दुग्धेन, एकः |
|---|

(क) गणेशः ................कक्षायां गीता .............. च पठतः।

(ख) तस्याः ................................ निर्मितं भोजनं कुर्वन्ति।

(ग) विश्वनाथः सर्वदा ............................... कार्यं करोति।

(घ) अयम् ..........................................आदर्शपरिवारः।

**५. यथायोग्यं पदद्वयं संयोज्य स्वाभ्यासपुस्तिकायां लिखत -**

| (क) | (ख) |
|---|---|
| (क) परिवारे पितामहः पितामही। | (अ) भोजनमन्त्रः च भवतः। |
| (ख) तस्य परिवारे प्रतिदिनं प्रातःस्मरणम्। | (आ) भ्राता, भ्रातृजाया तस्य पुत्रः पुत्री च निवसन्ति। |
| (ग) ब्रह्मार्पणं ब्रह्म हविः। | (इ) ब्रह्माग्नौ ब्रह्मणा हुतम्। |
| (घ) तेषाम् आहारे शाकानाम्। | (ई) यथेच्छं दुग्धं पिबतः। |
| (ङ) तौ भ्रातरौ। | (उ) फलानाम् चाधिक्यं वर्तते। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



६. **रेखाङ्कितानि पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) विश्वनाथस्य धेनुः कृष्णा अस्ति।

(ख) पुत्रस्य नाम गोविन्दः अस्ति।

(ग) विश्वनाथस्य संयुक्तः परिवारः अस्ति।

(घ) गौरी आदर्शभूता अस्ति?

७. **निम्नलिखितशब्दानां षष्ठी विभक्तिं कृत्वा लिखत –**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | बालकस्य | बालकयोः | बालकानाम् |
| (क) | रामः | ........................ | ........................ |
| (ख) | सुरेशः | ........................ | ........................ |
| (ग) | महेशः | ........................ | ........................ |
| यथा– | रमायाः | रमयोः | रमाणाम् |
| (घ) | गीता | ........................ | ........................ |
| (ङ) | सीता | ........................ | ........................ |
| (च) | अग्रजा | ........................ | ........................ |

८. **निम्नलिखितशब्दानां षष्ठी विभक्तिं कृत्वा लिखत –**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा– | नद्याः | नद्योः | नदीनाम् |
| (क) | गौरी | ........................ | ........................ |
| (ख) | पार्वती | ........................ | ........................ |
| (ग) | माधवी | ........................ | ........................ |
| यथा– | फलस्य | फलयोः | फलानाम् |
| (घ) | मन्दिरम् | ........................ | ........................ |
| (ङ) | मन्त्रम् | ........................ | ........................ |
| (च) | स्मरणम् | ........................ | ........................ |




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः

**कस्य केन सह सम्बन्धः अस्ति इति परिशील्य वदत –**




**अध्यापकाय निर्देशः –**

- अध्यापकः प्रातःस्मरणं व भोजनमन्त्रस्य स्मरणं कारयेत् ।
- अध्यापकः सम्बन्धवाचिशब्दानां ज्ञानं कारयेत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

नवमः पाठः
९

# पुष्करमेलापकः
( उपपदविभक्तिः )

(अत्र पवित्रपुष्करमेलापकस्य वर्णनम् अस्ति। मेलापके किं किं भवति कः कथम् आनन्दम् अनुभवति इति वयं पाठेऽस्मिन् जानीमः।)

''उत्सवप्रियो हि लोकः'' भारतीयानां तु प्रतिदिनम् एव यत्र कुत्रचित् उत्सवरूपेण एव भवति। यथा-पर्व, जन्मोत्सवः मेलापकः इत्यादयः। सर्वजनानां प्रियाः चिरप्रतीक्षिताः भवन्ति मेलापकाः।

अतः बहुविधाः भवन्ति मेलापकाः। यथा-विज्ञानपुस्तकमेलापकाः, संस्कृतपुस्तकमेलापकाः, पशुमेलापकाः,धार्मिकमेलापकाः इत्यादयः। राजस्थाने सर्वाधिकप्रियः धार्मिकमेलापकः भवति। तत्र हि सर्वेषाम् आस्थाकेन्द्रं पुष्करतीर्थमेलापकः केषाम् आकर्षणकेन्द्रं नास्ति।



विश्वप्रसिद्धं ब्रह्ममन्दिरम् अत्रैव शोभते। अन्यदपि वराहमन्दिरम्, रङ्गनाथमन्दिरम्, सावित्रीमन्दिरम् इत्यादीनि प्रसिद्धानि मन्दिराणि सन्ति।

प्रतिवर्षं भारतीयपञ्चाङ्गानुसारेण कार्तिकमासस्य शुक्लपक्षे एकादशीतः पूर्णिमातिथिपर्यन्तम् अत्र प्रसिद्ध-मेलापकस्य आयोजनं भवति। कार्तिकमासः पुण्यमासः भवति। मासे यात्रिणः अत्र विद्यमाने पुष्करसरोवरे स्नानं कुर्वन्ति स्वपापानि च नाशयन्ति। अत्र मेलापके बहवः वैदेशिकाः सम्मिलिताः भवन्ति। राजस्थानस्य कलां संस्कृतिं च ज्ञात्वा अभिभूताः भवन्ति। उष्ट्राणां धावनप्रतियोगिता, काष्ठपुत्तलिकानृत्यम्, रज्जुकर्षणस्पर्धा, अश्वसज्जाप्रतियोगिता अत्रत्याः आकर्षणकेन्द्रभूताः रमणीयाः च कार्यक्रमाः सन्ति। कार्यक्रमान् दृष्ट्वा जनाः नितरां प्रमुदिताः भवन्ति। सर्वत्र आपणा एव दृश्यन्ते।

अत्र बहुविधाः आपणाः सन्ति। एकत्र बालेभ्यः बहुविधिक्रीडनकानि मिलन्ति, केचन बालाः क्रीडन्ति, केचन पश्यन्ति, केचन परस्परं चर्चां कुर्वन्ति। क्रीडनकैः क्रीडन्ति अन्ये। पुरुषाः अपूपं खादन्ति। महिलाः वस्त्रापणेषु चित्रवस्त्राणि क्रीणन्ति। केचन कबड्डी स्पर्धां पश्यन्ति। ग्राम्याःकृषकादयः पशून्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



क्रीणन्ति विक्रयणं च कुर्वन्ति। रात्रिकाले चन्द्रस्य धवलचन्द्रिकायां सिकतामये प्रदेशे एते कार्यक्रमाः सर्वेभ्यः आह्लादकराः भवन्ति।

अनेन प्रकारेण पवित्रपुष्करतीर्थराजः भारते एव नहि अपितु अन्ताराष्ट्रियस्तरे जनानां आस्थायाः केन्द्रम् अस्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| मेलापकः | मेला | मेला |
| कुत्रचित् | कस्मिंश्चित् स्थाने | किसी स्थान पर |
| चिरप्रतीक्षिताः | बहुप्रतीक्षिताः | अधिक समय से प्रतीक्षित |
| शोभते | सुशोभितं भवति | सुशोभित होता है। |
| एकादशीतः | एकादशीतिथेः आरभ्य | एकादशी से लेकर |
| अभिभूताः | आश्चर्यचकिताः | आश्चर्य चकित |
| वैदेशिकाः | विदेशवासिनः | विदेश में रहने वाले |
| काष्ठपुत्तलिकाः | काष्ठनिर्मितां पुत्तलिकाः | कठपुतलियाँ |
| रज्जुकर्षणम् | रज्जुकर्षणः प्रतियोगिता विशिष्टा | रस्सी को खींचने की प्रतियोगिता |
| प्रमुदिताः | प्रसन्नाः | प्रसन्नचित्त |
| नितराम् | अत्यधिकम् | अत्यधिक |
| आपणाः | वस्तुविक्रयणस्थानानि | दुकाने |
| क्रीणन्ति | क्रयणं कुर्वन्ति | खरीददारी करते है। |
| स्पर्धा | प्रतियोगिता | प्रतियोगिता |
| सिकतामये | बालुकायुक्ते | रेतयुक्त |
| आह्लादकराः | प्रीतिकारकाः | प्रसन्न करने वाले |

## अभ्यासः

१. **निम्नपदानां उच्चारणं कुरुत -**

बहुविधप्रकारकाः, द्विपञ्चाशत्, पञ्चाङ्गानुसारेण, उष्ट्राणाम्, काष्ठपुत्तलिका,

बहुविधक्रीडनकानि, वस्त्रापणेषु, धवलचन्द्रिकायाम्, आह्लादकराः, अन्ताराष्ट्रियः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) सर्वजनानां चिरप्रतीक्षिताः के भवन्ति ?

(ख) राजस्थाने सर्वाधिकः प्रियः कः मेलापकः भवति ।

(ग) विश्वप्रसिद्धं ब्रह्ममन्दिरं कुत्र अस्ति ?

(घ) कस्मिन् मासे पुष्करे मेलापकः आयोजितः भवति ।

(ङ) पुष्करमेलापके बहवः के सम्मिलिताः भवन्ति ।

३. **निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत –**

(क) महिलाः वस्त्रापणेषु किं क्रीणन्ति ?

(ख) वैदेशिकाः राजस्थानस्य कां ज्ञात्वा अभिभूताः भवन्ति ?

(ग) मेलापके काः प्रतियोगिताः भवन्ति ?

(घ) मेलापके बालाः किं किं कुर्वन्ति ?

(ङ) कार्यक्रमाः सर्वेभ्यः कदा आह्लादकराः भवन्ति ?

४. **मञ्जूषातः उचितं शब्दं चित्वा रिक्तस्थानं पूरयत –**

| आह्लादकराः, सरोवरे, प्रमुदिताः, पुण्यमासः, चिरप्रतीक्षिताः |
|---|

(क) यात्रिणः ....................स्नानं कुर्वन्ति ।

(ख) सर्वजनानां प्रियाः ..................................भवन्ति मेलापकाः ।

(ग) कार्तिकमासः ..................................अस्ति ।

(घ) कार्यक्रमं दृष्ट्वा जनाः नितरां ........................भवन्ति।

(ङ) कार्यक्रमाः सर्वेभ्यः.......................... भवन्ति।

५. **रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –**

(क) राजस्थाने सर्वाधिकप्रियः धार्मिकमेलापकः भवति।

(ख) विश्वप्रसिद्धं ब्रह्ममन्दिरम् अत्रैव शोभते।

(ग) मेलापके बहवः वैदेशिकाः सम्मिलिताः भवन्ति।

(घ) पुष्करसरोवरे स्नानं कुर्वन्ति स्वपापानि च नाशयन्ति।

(ङ) राजस्थानस्य कलां ज्ञात्वा अभिभूताः भवन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**६. 'क' स्तम्भे विशेषणपदानि सन्ति 'ख' स्तम्भे विशेष्यपदानि दत्तानि सन्ति। तयोः परस्परं यथोचितं मेलनं कुरुत -**

| | (क) | (ख) |
|---|---|---|
| (क) | चिरप्रतीक्षिताः | जनाः |
| (ख) | विश्वप्रसिद्धम् | धार्मिकमेलापकः |
| (ग) | पुण्यमासः | मेलापकाः |
| (घ) | प्रमुदिताः | कार्तिकमासः |
| (ङ) | सर्वाधिकप्रियः | ब्रह्ममन्दिरम् |

**७. विलोमपदानि लिखत -**

(क) अधार्मिकः .........................

(ख) आस्था .........................

(ग) पुण्यानि .........................

(घ) दिनम् .........................

(ङ) प्रसिद्धम् .........................

**८. कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण वाक्यस्य पूर्तिं कुरुत -**

**यथा**- जलम् विना - जलेन विना जीवनं नास्ति। (जलम्)

(क) ................................ विना तृप्ति न भवति। (ज्ञानम् )

(ख) वृद्धः ................................विना न पश्यति। (उपनेत्रम्)

(ग) अधिकारी ...............विना कार्यालयं न गच्छति। (कारयानम्)

(घ) छात्रः .....................विना विद्यालयं न गच्छति। (पुस्तकानि)

**९. कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण वाक्यस्य पूर्तिं कुरुत -**

**यथा** - नरेन्द्रः मित्रेण सह विपणिं गच्छति।

(क) छात्रः ............................सह चर्चां करोति। (शिक्षकः)

(ख) कृषकः .........................सह वार्तां करोति। (आपणिकः)

(ग) पुत्री .......................... सह उद्यानं गच्छति। (जनकः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**१०. कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपं लिखत -**

(क) ............... अभितः वाहनानि सन्ति । (मार्गः)

(ख) ............... अभितः अजाः सन्ति। (वृक्षः)

(ग) ............... अभितः क्षेत्राणि सन्ति। (पवर्तः)

**११. कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपं लिखत -**

(क) ..................परितः जनाः सन्ति। (उष्ट्रः)

(ख) ................ परितः वृक्षाः सन्ति। (कूपः)


(ग) ................ परितः जलम् अस्ति। (ग्रामः)

**१२. कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण प्रयुज्य वाक्यम् रचयत -**

| | | | | |
|---|---|---|---|---|
| **यथा-** | अधिकारी | - | (कार्यालयः) | अधिकारी कार्यालयं प्रति गच्छति। |
| (क) | माता | - | (मन्दिरम्) | .................................. |
| (ख) | चिकित्सकः | - | (चिकित्सालयः) | .................................. |
| (ग) | अधिकारी | - | (कार्यालयः) | .................................. |
| (घ) | भगिनी | - | (अध्ययनकक्षः) | .................................. |

## योग्यता-विस्तारः

**१. चित्रं दृष्ट्वा उपपदविभक्तिं ( अभितः ) जानीत -**



**उष्ट्रम् अभितः** जलम् अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




२. चित्रं दृष्ट्वा उपपदविभक्तिं ( परितः ) जानीत –



**कृष्णं परितः** गोपालकाः सन्ति

३. चित्रं दृष्ट्वा उपपदविभक्तिं ( प्रति ) जानीत –



महिला **कूपं प्रति** गच्छति ।



सिंहः **नदीं प्रति** गच्छति ।

४. वर्णानां संयोजनम् इति सन्धि भवति –

यत्र व्यञ्जनानां मेलनं भवति सः व्यञ्जनसन्धिः भवति। उदा. – तत् + लीनः = तल्लीनः

**जश्त्व-सन्धिः** – वर्गस्य प्रथमद्वितीयतृतीयचतुर्थवर्णेभ्यः परे तृतीयचतुर्थवर्णाः भवन्ति अथवा प्रथमद्वितीयतृतीयचतुर्थवर्णाः पदान्ते भवन्ति चेत् एतेषां स्थाने वर्गस्य तृतीयवर्णाः भवन्ति।

| | | | | | |
|---|---|---|---|---|---|
| रामात् | – | रामाद् | चित्+आनन्दः | – | चिदानन्दः |
| जगत्+ईशः | – | जगदीशः | सत्+विचारः | – | सद्विचारः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



५. **राजस्थानस्य प्रमुखाः केचन मेलापकाः सन्ति तान् वयं जानीमः -**

| मेलापकाः | - | स्थानम् |
|---|---|---|
| खेजडली शहीद मेला | - | खेजड़ली (जोधपुर) |
| शीतला माता मेला | - | शील की डूँगरी (चाकसू, जयपुर) |
| भर्तृहरि मेला | - | भर्तहरि (अलवर) |
| फूलडोल का मेला | - | रामद्वारा (शाहपुरा-भीलवाड़ा) |
| डिग्गी कल्याण जी का मेला | - | डिग्गी मालपुरा (टोंक) |
| तीर्थराज मेला | - | मचकुण्ड (धौलपुर) |
| गणेश जी का मेला | - | रणथम्भौर (सवाई माधोपुर) |
| कैलादेवी मेला | - | कैलादेवी (करौली) |
| खाटू श्याम जी का मेला | - | खाटू श्याम जी (सीकर) |
| ऋषभदेव मेला | - | ऋषभदेव (धुलेव उदयपुर) |
| सालासर बालाजी मेला | - | सालासार-(सुजानगढ-चूरू) |
| दशहरा मेला | - | कोटा |
| कल्पवृक्ष मेला | - | मांगलियावास (अजमेर) |
| कजली तीज का मेला | - | बूंदी |
| डाडा पम्पाराम का मेला | - | पम्पाराम का डेरा विजय नगर (गंगानगर) |
| भूरिया बाबा मेला | - | गौतमेश्वर (सिरोही) |
| गोगा नवमी का मेला | - | गोगामेड़ी (हनुमानगढ़) |
| रामदेवरा का मेला | - | रामदेवरा, रुणेचा (जैसलमेर) |
| जम्भेश्वर मेला | - | मुकाम (बीकानेर) |
| मानगढ धाम मेला | - | मानगढ धाम (बाँसवाड़ा) |
| बेणेश्वर | - | बेणेश्वर, सावला (डूँगरपुर) |
| नाकोड़ा जी का मेला | - | नाकोड़ा तीर्थ (मेवानगर बाड़मेर) |
| कपिल मुनि का मेला | - | कोलायत (बीकानेर) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दशमः पाठः १०

# अमृतबिन्दवः

## ( समयज्ञानम् )

( अत्र महापुरुषाणाम् अनुभववचनानि सन्ति। एतानि चिन्तनीयानि मननीयानि जीवने पालनीयानि च सन्ति। )

**राष्ट्रं मम पिता माता प्राणाः स्वामी धनं सुखम्।**
**बन्धुराप्तः सखा भ्राता सर्वस्वं मे स्वराष्ट्रकम्।।१।।**

**भावार्थः** – मम पिता, माता, प्राणाः, स्वामी, धनं, सुखं, बन्धुः, मित्रं, भ्राता सर्वं मम राष्ट्राय एव अस्ति। अहं राष्ट्राद् अधिकं किमपि न गणयामि।

**सत्यं ब्रूयात् प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्।**
**प्रियं च नानृतं ब्रूयात्, एषः धर्मः सनातनः।।२।।**

**भावार्थः** – वयं सर्वदा सत्यं प्रियं च वदाम, सत्यं किन्तु अप्रियं न वदाम। प्रियं किन्तु असत्यम् अपि न वदाम। अयमेव अस्माकं प्राचीनधर्मः।

**अयं निजः परोवेति गणना लघुचेतसाम्।**
**उदारचरितानान्तु वसुधैव कुटुम्बकम्।।३।।**

**भावार्थः** – एतद् मम एतत् तव इति शुद्रभावना। विचारवन्तः जनाः तु समस्तपृथिवीम् एव स्वकुटुम्बं चिन्तयन्ति।

**श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन।**
**विभाति कायः करुणापराणां परोपकारेण न चन्दनेन।।४।।**

**भावार्थः** – कर्णस्य शोभा वेदश्रवणेन भवति कुण्डलेन न। हस्तस्य शोभा दानेन भवति कङ्कणेन न, करुणापराणां शरीरस्य शोभा परोपकारेण भवति चन्दनेन न।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेद्।।**
**एवं पुरुषकारेण विना दैवं न सिद्ध्यति।।५।।**

**भावार्थः** – एकेन चक्रेण रथस्य गतिः न भवति तत्र चक्रद्वयम् आवश्यकम्। तथैव कार्यसिद्धये पुरुषार्थः भाग्यम् च द्वयमपि आवश्यकं केवलं भाग्यं न पर्याप्तं न च पुरूषार्थः।



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



**विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय।**
**खलस्यसाधोर्विपरीतमेतत्, ज्ञानाय दानाय च रक्षणाय।। ६ ।।**

**भावार्थः** - दुष्टः विद्यायाः प्रयोगं विवादाय, धनस्य प्रयोगम् अहङ्काराय, शक्तेः प्रयोगं च अन्यपीडनाय करोति किन्तु सज्जनः तु विद्यायाः प्रयोगं ज्ञानाय, धनस्य दानाय, शक्तेश्च रक्षणाय करोति ।

**परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्।। ७ ।।**



**भावार्थः** - वृक्षाः फलानि अन्येभ्यः एव यच्छन्ति, नद्यः स्वजलं, गावः च स्वदुग्धम् अन्येभ्यः एव ददति, स्वयम् उपयोगं न कुर्वन्ति। एतेषाम् एषा परोपकारपरम्परा।

**रूपयौवनसम्पन्नाः विशालकुलसम्भवाः।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः।। ८ ।।**

**भावार्थः** - जनाः रूपवन्तः सन्ति, युवावस्थावन्तः सन्ति, प्रसिद्धकुले च उत्पन्नाः अपि सन्ति यदि ते विद्याहीनाः सन्ति तर्हि ते शोभिताः न भवन्ति। यथा किंशुकाः गन्धरहिताः भवन्ति अर्थात् गुणरहिताः भवन्ति अतः तान् न कोऽपि इच्छति।

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।।**
**साधवो नैव सर्वत्र चन्दनं न वने वने।। ९ ।।**

**भावार्थः** - प्रत्येकस्मिन् पर्वते माणिक्यम् इत्याख्यं रत्नं न भवति। प्रत्येकस्मिन् गजे मौक्तिकम् इत्याख्यं रत्नं न मिलति। प्रत्येकं वने चन्दनं न मिलति। तथैव सज्जनपुरुषाः सर्वत्र न मिलन्ति।

**धनधान्यप्रयोगेषु विद्यायाः सङ्ग्रहे तथा।**
**आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेद्।। १० ।।**

**भावार्थः** - धनस्य अन्नस्य विद्यायाः च सङ्ग्रहे, भोजने परस्परं व्यवहारे च लज्जा न करणीया। यः एतेषु लज्जां करोति सः दुःखी भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| बन्धुः | भ्राता | भाई |
| ब्रूयात् | वदेत् | बोलना चाहिए |
| अनृतम् | मिथ्या | झूठ |
| निजः | स्वस्य | अपना |
| परः | अन्यः | पराया |
| लघुचेतसाम् | क्षुद्रचिन्तनशील-जनानाम् | छोटा चिन्तन करने वालों का |
| श्रोत्रम् | कर्णः | कान |
| पाणिः | हस्तः | हाथ |
| कङ्कणेन | हस्ताभूषणेन | कंगन से |
| विभाति | शोभते | सुशोभित होता है। |
| पुरुषकारेण | पुरुषार्थेन | परिश्रम से |
| खलस्य | दुष्टस्य | दुष्ट का |
| प्रजायते | उत्पन्नं भवति | उत्पन्न होता है। |
| शैले | पर्वते | पर्वत पर |
| लज्जा | सङ्कोचः | संकोच |

## अभ्यासः

१. **निम्नलिखितशब्दानां शुद्धोच्चारणं कुरुत –**

बन्धुराप्तः, स्वराष्ट्रकम्, ब्रूयात्, नानृतम्, उदारचरितानान्तु, कुटुम्बकम्, श्रुतेनैव, कङ्कणेन, ह्येकेन, विपरीतमेतत्, परोपकारार्थमिदम्, त्यक्तलज्जः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



२. **पाठे प्रदत्तपद्यानां सस्वरं वाचनं कुरुत –**

३. **प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) परोपकारेण केषां कायः विभाति?

(ख) अयं निजः परो वेति केषां गणना अस्ति?

(ग) केषां वसुधैव कुटुम्बकम्?

(घ) किं न ब्रूयात्?

(ङ) केन विना दैवं न सिद्ध्यति?

४. **प्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

(क) हस्तस्य शोभा केन भवति?

(ख) करुणापराणां कायः केन विभाति?

(ग) माणिक्यं मौक्तिकं च कुत्र कुत्र न वर्तेते?

(घ) कुत्र लज्जा न करणीया?

(ङ) खलस्य किं किं अन्यस्य पीडनाय भवति?

५. **श्लोकांशैः रिक्तस्थानानि पूरयत –**

(क) प्राणाः स्वामी ......................सुखम्।

(ख) ...............................नानृतं ब्रूयात्।

(ग) अयं ..............................परोवेति।

(घ) साधवो नैव.......................वने वने।

(ङ) परोपकाराय.......................शरीरम्।

६. **रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) न ब्रूयात् <u>सत्यमप्रियम्</u>।

(ख) <u>पुरुषकारेण</u> विना दैवं न सिद्ध्यति।

(ग) साधवो न हि <u>सर्वत्र</u>।

(घ) <u>एषः</u> धर्मः सनातनः।

(ङ) <u>परोपकाराय</u> दुहन्ति गावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



७. **निम्नलिखितपदानां सन्धिविच्छेदं कुरुत –**

(क) बन्धुराप्तः --------- + --------

(ख) नानृतम् --------- + --------

(ग) वसुधैव --------- + --------

(घ) जलमन्नम् --------- + --------

(ङ) नैव --------- + --------

८. **संस्कृतेन समयं लिखत –**

**यथा –** ६:०० = षड्वादनम्।

(१) ९:३० = ---------------- ।

(२) ८:०० = ---------------- ।

(३) १०:४५ = ---------------- ।

(४) ११:३० = ---------------- ।

(५) १२:१५ = ---------------- ।

९. **कोष्ठकात् समयं चित्वा अक्षरैः लिखित्वा रिक्तस्थानं पूरयत –**

(क) बालकः .................. वादने विद्यालयं गच्छति। ( ८:०० )

(ख) माता ............................... अल्पाहारं पचति। ( ७:०० )

(ग) नरेन्द्रः सायं ..................दूरदर्शने वार्तां शृणोति। ( ९:३० )

(घ) रेलयानं प्रातः ..................... जोधपुरं गच्छति। ( ६:४५ )

(ङ) श्यामः ..............................अध्ययनं करोति। ( १०.१५ )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः

१. प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।। १ ।।
वरं प्राणपरित्यागो अपमानेन जीवनात्।
प्राणत्यागे क्षणं दुःखं मानभङ्गे दिने दिने।। २ ।।
अधमाः धनमिच्छन्ति धनमानञ्च मध्यमाः।
उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।। ३ ।।

२. **संस्कृतेन समय जानीमः -**


पञ्चवादनम्
५:००



सपादपञ्चवादनम्
५:१५



सार्धत्रिवादनम्
३:३०


पादोननववादनम्
८:४५


पञ्चाधिकपञ्चवादनम्
५:०५


दशाधिकषड्वादनम्
६:१०


पञ्चोनद्विवादनम्
१:५५


दशोनत्रिवादनम्
२:५०

३. **समयज्ञानस्य भाषाक्रीडा जानीमः -**

शिक्षकः छात्रद्वयस्य मध्ये क्रीडां कारयेत्। एकः छात्रः प्रश्नं पृच्छेत्- त्वं कदा उत्तिष्ठसि ?

द्वितीयः छात्रः उत्तरं वदेत् अहं .................वादने उत्तिष्ठामि।

एवं बहून् गणान् रचयित्वा छात्राणां मध्ये परस्परम् अभ्यासं कारयेत्।

**अध्यापकाय निर्देशः**

१. अध्यापकः उपरोक्तानुसारेण समयज्ञानं कारयेत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एकादशः पाठः
११

# उद्यानविहारः

(पाठेऽस्मिन् उद्याने विद्यार्थि-आचार्ययोः मध्ये फलानि, वृक्षान् चाधारीकृत्य वार्तालापः अस्ति। अनेन पाठमाध्यमेन फलानां, वृक्षाणां च नाम्ना ज्ञानं प्राप्स्यन्ति। विद्यार्थिनः प्रकृतिं प्रति प्रेमभावः जागृतः भविष्यति।)

**आचार्यः** – छात्राः! अद्य वयं भ्रमणार्थम् उद्यानं गमिष्यामः। तत्र बहून् वृक्षान् द्रक्ष्यामः।

**सुरेशः** – आचार्यवर! नगरात् बहिः एकं विशालम् उद्यानम् अस्ति। तदेव वयं द्रष्टुं इच्छामः।

**(उद्यानं गत्वा)**



**आचार्यः** – मालाकार ! शोभनं खलु तव उद्यानम् , अत्र बहवः जनाः प्रतिदिनं विहाराय उद्यानम् आगच्छन्ति। वयं त्वया किञ्चिद् ज्ञातुम् इच्छामः।

**मालाकारः** – पृच्छन्तु भवन्तः यथेच्छम्। अहं यावद् जानामि तावद् वक्ष्यामि।

**मुकेशः** – भद्र! कति वृक्षाः सन्ति तव उद्याने ?

**मालाकारः** – न जानामि निश्चितसङ्ख्यां तु, परं शताधिकाः वृक्षाः सन्ति।

**राधा** – भद्र! युष्माकम् उद्याने केषां फलानां वृक्षाः सन्ति ?

**मालाकारः** – अत्र आम्राणां, दाडिमानां, नारङ्गाणां, जम्बीराणां, बदराणां, च वृक्षाः सन्ति।

**राकेशः** – किं युष्माकम् उद्याने आरुकाणि, पालवेतफलानि, अलीचीकाः, वातादानि, अमृतफलानि च न सन्ति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**मालाकारः** – एतानि फलानि शीतप्रदेशेषु एव भवन्ति। मम उद्यानं तु उष्णप्रदेशेषु स्थितम् अस्ति।

**सलमा** – किं अत्र निम्बवृक्षाः न सन्ति।

**मालाकारः** – भवन्तः तत्र पश्यन्तु। तत्र निम्बवृक्षाः, शिंशपाः, शुभाञ्जनाः, कोविदाराः, अन्ये चापि वृक्षाः सन्ति। ते छायां यच्छन्ति।

**आचार्यः** – भद्र! तव उद्याने अधुना कानि फलानि पक्वानि सन्ति।

**मालाकारः** – अधुना तु आम्राणि एव पक्वानि सन्ति।

**आचार्यः** – तर्हि आनय अस्मभ्यम्। वयं सर्वे तव कूपजलेन तानि प्रक्षाल्य खादिष्यामः मूल्यं च दास्यामः।

**मालाकारः** – श्रीमन्तः! प्रकोष्ठात् आनयामि।(गत्वा एकस्मिन् करण्डे आम्राणि आनयति) इमानि आम्रफलानि।

**छात्राः** – अहो! मनोहराणि इमानि फलानि।

**आचार्यः** – कियत् एतेषां मूल्यम्।

**मालाकारः** – केवलं अशीतिः रूप्यकाणि।

(आचार्यः मालाकाराय अशीतिः रुप्यकाणि यच्छति तदन्तरं सर्वे छात्राः कूपं प्रति गच्छन्ति। तत्र सर्वे छात्राः आचार्याः च जलेन आम्राणि प्रक्षाल्य खादन्ति प्रसीदन्ति च।)

**आचार्यः** – भो बालकाः! शृण्वन्तु सर्वैः आम्रवृक्षस्य त्वग्बीजानि अवकरपात्रे एव पातनीयानि न इतस्ततः।

**सलमा** – अत्यन्तं मधुराणि आम्राणि एतानि। मम मनः भृशं मोदते एककिलोपरिमितस्य कियत् मूल्यम् ?

**मालाकारः** – चत्वारिंशता रूप्यकैः एककिलोपरिमितम्।

**सलमा** – तर्हि अर्धकिलोपरिमितं ददातु।

**आचार्यः** – मन्ये युष्माभिः सह मया अपि इदानीम् उद्यानस्य आनन्दः सम्यक् अनुभूतः। उद्याने शोभमानाः एते वृक्षाः यथा मधुराणि फलानि प्रादुर्भावयन्ति तथैव जीवनोपयोगिकाष्ठं ततः अधिकं च स्वच्छं वातावरणं सृजन्ति, यत् खलु अस्माकं जीवनाय नितराम् आवश्यकम् अस्ति। अतः अस्माभिः सर्वैः उद्यानानां संरक्षणाय संवर्धनाय च बद्धपरिकरैः भाव्यम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| द्रष्टुम् | दर्शनार्थम् | देखने के लिए |
| गत्वा | गमनं कृत्वा | जाकर |
| ज्ञातुम् | ज्ञानार्थम् | जानने के लिए |
| आम्राणाम् | आम्रफलानाम् | आमों के |
| दाडिमानाम् | दाडिमफलविशेषाणाम् | अनार के |
| नारङ्गाणाम् | नारङ्फलविशेषाणाम् | संतरों के |
| भद्रः | सज्जनः | महाशय |
| पक्वानि | रसपरिपूर्णानि | पके हुए |
| पालवेतफलानि | सेवफलानि | सेब |
| अस्मभ्यम् | अस्माकम् कृते | हमारे लिए |
| प्रक्षाल्य | क्षालनं कृत्वा | धोकर |
| प्रकोष्ठात् | भण्डारगृहात् | भण्डार गृह से |
| करण्डे | फलपात्रे | टोकरे में |
| प्रादुर्भावयन्ति | उत्पादयन्ति | उत्पन्न करते हैं। |
| सृजन्ति | निर्मान्ति | बनाते है। |
| नितराम् | पूर्णरुपेण | बिल्कुल |
| बद्धपरिकरैः | दृढनिश्चयैः | दृढ निश्चय किये हुए |

## अभ्यासः

१. निम्नलिखितशब्दानाम् उच्चारणं कुरुत –

द्रक्ष्यामः, इच्छामः, द्रष्टुम्, पृच्छतु

यथेच्छम्, वक्ष्यामि, दास्यामि, किञ्चित्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**२. एकपदेन उत्तराणि लिखत –**

(क) उद्यानं कीदृशम् अस्ति ?

(ख) उद्याने कति वृक्षाः सन्ति ?

(ग) विहाराय जनाः कुत्र आगच्छन्ति ?

(घ) स्वच्छं वातावरणं के सृजन्ति ?

(ङ) सलमा कियत् किलोपरिमितानि आम्रफलानि क्रीणाति।

**३. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) वयं तव उद्यानम् आगच्छामः।

(ख) जनाः प्रतिदिनं विहाराय उद्यानम् आगच्छन्ति।

(ग) वयं सर्वे तव कूपजलेन फलानि प्रक्षालयामः।

(घ) एकस्मिन् च करण्डे आम्राणि आनयति।

**४. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत –**

| त्वया, उद्याने , फलानि, पक्वानि, एतानि |
|---|

(क) उद्याने अधुना.............. फलानि सन्ति।

(ख) वयं............................. किञ्चित ज्ञातुम् इच्छामः।

(ग) ................. फलानि शीतलप्रदेशेषु एव भवन्ति।

(घ) छात्राः आचार्यः च .................... खादन्ति।

(ङ) कति वृक्षाः सन्ति तव................. ।

**५. अधोलिखितानां पदानां लिङ्गं, विभक्तिं, वचनं च लिखत –**

| यथा – जनाः | पुँल्लिङ्गम् | प्रथमा विभक्तिः | बहुवचनम् |
|---|---|---|---|
| (क) नगरात् | .................... | .................... | ................ |
| (ख) युवकेभ्यः | .................. | .................... | ................. |
| (ग) उद्याने | .................. | .................... | .................. |
| (घ) आचार्याः | .................. | .................... | .................. |
| (ङ) पक्वानि | .................... | .................... | ................... |
| (च) जीवनाय | .................... | .................... | .................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**६. असङ्गतं पदं चिनुत -**

(क) वक्ष्यामि, दास्यामि, पास्यामि, आम्राणि। ........................

(ख) आम्राणां, मनुष्याणां, दाडिमानां, बदराणां। ........................

(ग) इमानि, एतानि, कानि, सेवानि। ........................

(घ) मालाकारः, आचार्यः, रमेशः, बहवः। ........................

**७. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -**

| हरितः, नीलः, कृष्णः, पीतः |
|---|






(क) शुकस्य वर्णः ....................अस्ति।

(ख) युतकस्य वर्णः....................अस्ति।


(ग) आकाशस्य वर्णः ................अस्ति।

(घ) कोकिलस्य वर्णः................अस्ति।

## योग्यता-विस्तारः

**मञ्जूषातः उचितपदं चित्वा वाक्यानि पूरयत -**

| पुष्पाणि, उद्यानम्, कन्दुकेन, भ्रमणम्, दोलायाम्, सरोवरः, कमलानि, बालकाः |
|---|



इदम् एकम् ...................................... अस्ति।

अत्र विविधानि ........................... विकसितानि सन्ति। उपवने एका बालिका .......................... उपविष्टा दृश्यते। बालकाः............................ क्रीडन्ति। जनाः प्रातः काले .............................. कुर्वन्ति। उद्याने एकः जलपूर्णः............................ अपि अस्ति। तस्मिन् अनेकानि................... ................. विकसन्ति। सरोवरस्य तटे ................................. क्रीडन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

द्वादशः पाठः
१२

# पर्यावरणचेतना

## ( यण् सन्धिः )

(पर्यावरणं प्रति ज्ञानं जागरुकता च वर्तमानकालस्य आवश्यकता अस्ति। पर्यावरणस्य हानिकारकाणि तत्त्वानि रक्षणोपायान् च वयं पाठेऽस्मिन् ज्ञास्यामः।)

भौतिकपर्यावरणे प्रकृत्या प्रदत्तं प्राणतत्वं रक्षाकवचं च वर्तते। जीवमात्रस्य विकासाय पर्यावरणशुद्धिः आवश्यकी वर्तते। अस्मान् परितः यत् आवरणम् तत् पर्यावरणम्। पर्यावरणे पृथिवी, आकाशः, वायुः, जलम्, अग्निः **इत्येतानि** पञ्चतत्वानि सन्ति। एतेषां तत्वानां दूषणेन **पर्यावरणं** प्रदूषितं **भवेत्येव।**

सम्प्रति न केवलं भारते अपितु समस्ते भूमण्डले प्राकृतिकम् असन्तुलनं समुत्पन्नम्। कुत्रचिद् अनावृष्टिः कुत्रचित् अल्पवृष्टिः अतिवृष्टिः च भवति साम्प्रतम्। जनानाम् आवश्यकतापूर्तये उद्योगानां , राजमार्गाणां जलबन्धानां रेलमार्गाणां सञ्चारसाधनानां च विस्तारः अपेक्षितः अतः स्वार्थवशात् मानवेन प्रकृतिकोषात् मृत्तिक-प्रस्तर-धातु-काष्ठादीनि परिलुण्ठितानि। यदि इत्थमेव प्रदूषणेन तापवृद्धिः भवेत् **तर्ह्यवश्यमेव** ध्रुवक्षेत्रे हिमगलनेन जलप्रलयः भविष्यति।

भूमि-जल-वायु-ध्वनि प्रदूषणानि चिन्तनीयानि। **वायवः** कीटाणून् इतस्ततः नयन्ति, वायोः अभावेन न जीवधारिणः जीवन्ति ।कीटनाशकानां वर्धमानेन प्रयोगेण पृथिव्याः अन्नफलादीनि प्रदूषितानि जातानि। महानगरेषु वाहनानां निर्बाधप्रचलनेन, ध्वनिप्रसारयन्त्रद्वारा विज्ञापनेन, नूतनयन्त्राणां नादेन च कर्णस्फोटकध्वनिः अहोरात्रम् उत्पद्यते । तेन मानवस्य मनसः शान्तिः विलुप्ता । जनाः अनिद्रारोगेण विक्षिप्ताः इव सन्ति। नदीतडागनिर्झरेषु अवशिष्टवस्तूनाम् आवाञ्छितवस्तूनां च क्षेपणेन जलं प्रदूषितं भवति। वाहनानां धूमः यन्त्रागारेभ्यः निर्गच्छद् वायुः च वायुमण्डलं दूषयति।



अतः अस्माकं सर्वेषां दायित्वम् अस्ति यत् यानि **कान्यपि** प्रदूषणानि जायमानानि सन्ति , तानि निवारयितुं प्रयासं करवाम। प्रदूषणानि न भवेयुः तथा उपायान् अपि चिन्तयाम।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



भारतीयसंस्कृतिः पर्यावरणस्य सम्पोषिका अस्ति। पादपानां संरक्षणम् अस्माकं परम्परा वर्तते। पूर्वजानां सुशिक्षायाः कारणादेव जोधपुरस्य समीपे खेजडली ग्रामे अमृतादेव्याः नेतृत्वे शमीवृक्षाणां संरक्षणार्थं ३६३ पुरुषाः महिलाश्च स्वप्राणरक्षणस्य चिन्ताम् अकृत्वा शिरोश्छेदनं कारितवन्तः। विश्वेऽस्मिन् वृक्षरक्षणार्थं स्वप्राणदानस्य इयम् विश्वस्य अद्वितीयघटना अस्ति । उत्तराखण्डे सुन्दरलालबहुगुणस्य नेतृत्वे वृक्षाणां रक्षार्थम् आलिङ्गनान्दोलनं (चिपको-आन्दोलन) सञ्चालितम्। **प्रत्येकस्मिन्** वर्षे जूनमासस्य पञ्चमे दिनाङ्के 'विश्वपर्यावरणदिवसः' आचर्यते। भारतसर्वकारः पर्यावरणसंरक्षणाय एव 'स्वच्छभारताभियानम्' 'निर्मलगङ्गायोजनां' च सञ्चालयति।

पर्यावरणप्रदूषणस्य निरोधाय जनाः यत्र तत्र मलमूत्रप्रक्षेपणं न कृत्वा प्रत्येकस्मिन् गृहे शौचालयस्य निर्माणं कारयेयुः। बालकाः युवकाः कृषकाः युवत्यः च विद्यालयेषु, उद्यानेषु, गृहोद्यानेषु क्षेत्रेष्वाधिक्येन वृक्षारोपणं कुर्युः। वृक्षच्छेदकानां कृते कठोरदण्डव्यवस्था भवेत्। महानगरेषु मध्ये-मध्ये सघनानां हरितानाम् उद्यानानां विकासेन वायुप्रदूषणं **न्यूनं** कर्तुं शक्यते।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| प्रकृत्या | दैवेन | प्रकृति के द्वारा |
| परितः | चतुर्दिशासु | चारों ओर |
| तेजांसि | तपांसि | तेज |
| प्रदूषितम् | मलिनम् | अशुद्ध |
| समुत्पन्नम् | प्रादुर्भूतम् | उत्पन्न |
| कुत्रचित् | कस्मिंश्चित् स्थाने | कहीं भी |
| साम्प्रतम् | अधुना | अब |
| अनावृष्टिः | वृष्टेः अभावः | अकाल |
| परिलुण्ठितानि | चोरितानि | लूटे गये |
| इतस्ततः | यत्र तत्र | इधर उधर |
| नादेन | ध्वनिना | आवाज से |
| अहोरात्रम् | अहर्निशम् | दिनरात |
| उत्पद्यते | उत्पन्नः भवति | उत्पन्न होता है |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| विलुप्ता | समाप्ता | समाप्त |
| तडागः | सरोवरः | तालाब |
| स्वप्राणदानस्य | आत्मप्राणानां त्यागस्य | अपने प्राण देने की |
| आलिङ्गनान्दोनम् | चिपको आन्दोलनम् नाम्ना प्रसिद्धम् | चिपको आन्दोलन |
| वृक्षच्छेदकानाम् | तरूणां कर्तकानाम् | पेड़ काटने वालों का |
| द्रुमः | वृक्षः | पेड़ |

## अभ्यासः

**१. निम्नलिखितपदानाम् उच्चारणं कुरुत –**

पृथिव्याकाशः, अनावृष्टिः, मृत्प्रस्तरकाष्ठादीनि, परिलुण्ठितानि, निर्बाधप्रचलनेन, कर्णविस्फोटकध्वनिः, अनिद्रारोगेण, स्वच्छभारताभियानम्, शिरश्छेदनम्, कारितवन्तः।

**२. एकेन शब्देन उत्तरत –**

(क) वायवः कान् इतस्ततः नयन्ति ?

(ख) के अनिद्रारोगेण विक्षिप्ता इव सन्ति ?

(ग) भारतीयसंस्कृतिः कस्य सम्पोषिका अस्ति ?

(घ) केषां कृते कठोरदण्डव्यवस्था भवेत् ?

(ङ) केषां रोपणं फलदायकम् अस्ति ?

**३. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

(क) पर्यावरणे कानि–कानि तत्वानि सन्ति ?

(ख) खेजडलीग्रामे शमीवृक्षाणां संरक्षणार्थं कियन्तः जनाः शिरश्छेदनं कारितवन्तः ?

(ग) पर्यावरणदिवसः कदा आयोज्यते ?

(घ) वृक्षरक्षणार्थं स्वप्राणदानस्य घटना कस्मिन् ग्रामे अभवत् ?

(ङ) भारतसर्वकारः पर्यावरणसंरक्षणार्थं कानि अभियानानि चालयति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



४. **कोष्ठकेभ्यः उचितपदानि चित्वा वाक्यानि पूरयत –**

(क) वाहनानां धूमः यन्त्रागारेभ्यः निर्गच्छत् वायुश्च .......................दूषयति ।

(जलमण्डलम् /वायुमण्डलम्)

(ख) वृक्षाणां रक्षणार्थं आलिङ्गनान्दोलनम् ..............................अभवत् ।

(उत्तराखण्डे/उत्तरप्रदेशे )

(ग) जूनमासस्य पञ्चमे दिनाङ्के ............................भवति।

(विश्वपर्यावरणदिवसः/जलदिवसः )

(घ) पर्यावरणे ............................तत्त्वानि सन्ति। (पञ्च/सप्त)

(ङ) प्रसिद्धखेजडलीग्रामः ............................समीपे वर्तते। (जयपुरस्य/जोधपुरस्य)

५. **उदाहरणानुसारं पदानां विभक्तिं वचनं च लिखत –**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा– | पर्यावरणे | सप्तमी | एकवचनम् |
| (क) | जलम् | .............. | .............. |
| (ख) | विकासस्य | .............. | .............. |
| (ग) | शिक्षायाः | .............. | .............. |
| (घ) | दूषणेन | .............. | .............. |
| (ङ) | घटना | .............. | .............. |

६. **उचितविलोमपदानि योजयित्वा स्वाभ्यासपुस्तिकायां लिखत –**

| | | |
|---|---|---|
| (क) | शुक्लपक्षः | तत्र |
| (ख) | दूषितम् | अनावश्यकम् |
| (ग) | तादृशी | कृष्णपक्ष |
| (घ) | अत्र | नाशनम् |
| (ङ) | रक्षणम् | निर्मलम् |
| (च) | आवश्यकम् | एतादृशी |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



७. **भिन्नवर्गस्य पदं चिनुत -**

यथा - कोकिला , चटका , लता , शुका — लता

(क) फलम् , पत्रम् , पुष्पम् , मित्रम् ---------

(ख) भोजनम् , जलम् , वार्तापत्रम् , दुग्धम् ---------

(ग) शिक्षिका , अध्यापिका , लेखिका , अभ्यासपुस्तिका ---------

(घ) आकाशः , चन्द्रः , मेघः , कर्णः ---------

८. **निम्नाङ्कितपदेभ्यः उपसर्गं चिनुत -**

| पदम् | उपसर्गः |
| --- | --- |
| यथा - प्रदूषणम् | प्र |
| आवरणम् | -------- |
| निर्गच्छत् | -------- |
| अवशिष्टः | -------- |
| प्रयोगेण | -------- |
| विलुप्ता | -------- |

९. **सत्यकथनस्य पुरतः ''आम्'' असत्यकथनस्य च पुरतः ''न'' इति लिखत -**

(क) प्रतिवर्षे जूनमासस्य सप्तमे दिनाङ्के ''विश्वपर्यावरण-दिवसः'' आचर्यते। [ ]

(ख) उत्तराखण्डे सुन्दरलालबहुगुणस्य नेतृत्वे वृक्षाणां रक्षणार्थम् ''आलिङ्गनान्दोलनम्'' चालितम्। [ ]

(ग) खेजडलीघटना वृक्षरक्षणार्थं जयपुरनगरस्य समीपे अभवत्। [ ]

(घ) भारतीया संस्कृतिः पर्यावरणस्य सम्पोषिका अस्ति। [ ]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः

१. वृक्षाणां महत्त्वस्य विषये पुराणेष्वपि उक्तम्-

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः ।।



वृक्षाणां रोपणं फलदायकम् अस्ति इति महाभारतेऽपि लिखितम् -
'वृक्षाणां कर्तनं पापं वृक्षाणां रोपणं हितम् ।'

२. **सन्धिं जानीत -**

स्वरसन्धेः एकः भेदः **यण् सन्धिः** अस्ति। यण् अर्थात् य् व् र् ल् । य् व् र् ल् इति चत्वारः यणादेशाः सन्तिः।

एते कदा कस्य च स्थाने भवन्ति इति तालिकया जानीम।

| | |
|---|---|
| इ + भिन्नः स्वरः (अ, उ, ऋ, लृ, ए, ऐ, ओ, औ) | य् |
| उ + भिन्नः स्वरः (अ, इ, ऋ, लृ, ए, ऐ, ओ, औ) | व् |
| ऋ + भिन्नः स्वरः (अ, इ, उ, लृ, ए, ऐ, ओ, औ) | र् |
| लृ + भिन्नः स्वरः (अ, इ, उ, ऋ, ए, ऐ, ओ, औ) | ल् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**यथा** – प्रति + अयः = प्रत्ययः

परि + आवरणम् = पर्यावरणम्

सु+आगतम् = स्वागतम्

पितृ + आज्ञा = पित्राज्ञा

लृ + आकृतिः = लाकृतिः

३.




**अध्यापकाय निर्देशः**

- शिक्षकः छात्राणां द्वारा वृक्षाणाम् उपयोगिताविषयकं नाट्यमञ्चनं कारयेत्। यस्मिन् ते बालाःवृक्षाणाम् अभिनयं कृत्वा स्वोपयोगितायाः विषयं प्रतिपादयेयुः। अत्र एतादृशानि अन्यविधनाटकानि अपि अभिनेयानि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

त्रयोदशः पाठः १३

# प्रहेलिकाः

(क्रमवाचीशब्दाः १-२०)

**रेफादौ च मकारोऽन्ते वाल्मीकिः यस्य गायकः।**
**सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रियः। ।।१ ।।**

**भावार्थः** - यस्य शब्दस्य आरम्भे रेफः (र) अस्ति। यस्य शब्दस्य च अन्ते मकारः (म) अस्ति। यद् उत्तरम् अस्ति तस्य गानं वाल्मीकिः अकरोत्। सः राजा आसीत् तस्य राज्यं सर्वोत्तमं राज्यम् इति प्रसिद्धम् अस्ति। वदत कः सः ?

**शोभितोऽस्मि शिखण्डेन दीर्घैः पक्षैरलङ्कृतः।**
**राष्ट्रियो विहङ्गश्चास्मि, नृत्यं पश्यन्ति मे जनाः। ।।२ ।।**

**भावार्थः** - सः पिच्छेन सुशोभितः अस्ति तस्य पक्षौ विशालौ स्तः। तस्य नृत्यं आनन्ददायकं भवति अतः जनाः पश्यन्ति। सः राष्ट्रियः खगः अपि अस्ति। वदत सः कः ?

**न तस्यादिः न तस्यान्तः मध्ये यः तस्य तिष्ठति।**
**तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद। ।।३ ।।**

**भावार्थः** - तस्य प्रारम्भे नकारः (न) अस्ति अन्तेऽपि नकारः (न) अस्ति। मध्ये तस्य यकारः (य) विद्यते तत् तव समीपे अस्ति मम समीपेऽपि अस्ति। तत् किम्।

**कृष्णमुखी न मार्जरी द्विजिव्हा न च सर्पिणी।**
**पञ्चेशा सा न पाञ्चाली, यो जानाति सः पण्डितः। ।।४ ।।**

**भावार्थः** - मम मुखं कृष्णम् अस्ति किन्तु अहं मार्जारी नास्मि। मम मुखद्वयम् अस्ति किन्तु अहं सर्पिणी अपि नास्मि। मम पञ्च स्वामिनः सन्ति परन्तु अहं द्रौपदी अपि नास्मि। वदत मम नाम किम् ?

**अस्थि नास्ति शिरो नास्ति, बाहुरस्ति निरङ्गुलि।**
**नास्ति पादद्वयं गाढम्, अङ्गम् आलिङ्गति स्वयम्। ।।५ ।।**

**भावार्थः** - मयि अस्थि, शिरः, बाहुः, अङ्गुलिः, पादौ, इत्यादिषु किमपि नास्ति। तथापि अहं अङ्गानि बलेन आलिङ्गामि। वदत अहं कः ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




**तिष्ठामि पादेन बली न पङ्गुः , दाता फलानां न कृतिर्न यत्नः।**
**मौनेन जीवामि मुनिर्न मूकः, सेव्योऽस्मि कोऽयं नृपतिर्न देवः। ।।६।।**


**भावार्थः** – अहं सर्वदा पादेन एव तिष्ठामि अहं राजा बली नास्मि पंगुः अपि नास्मि। अहं मौनपूर्वकं जीवनं जीवामि अहं मुनिः नास्मि मूकः अपि नास्मि ।वदत अहं कः?

**उत्तराणि** –


युतकम्


मयूरः


वृक्षः


लेखनी


नयनम्


रामः

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| रेफादौ | प्रारम्भे रेफः | प्रारम्भ में र |
| शिरः | मस्तकम् | सिर |
| शिखण्डेन | शिखया | मोर की कलंगी |
| गाढम् | बलपूर्वकम् | कसकर |
| पक्षैः | पक्ष्मभिः | पंखों से |
| कृतिः | रचना | रचना |
| विहङ्गः | खगः | पक्षी |
| सेव्योऽस्मि | सेवायोग्यः | सेवा योग्य हूँ। |
| अपदम् | पादरहितम् | बिना पैर वाला |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| तिष्ठामि | स्थितः अस्मि | स्थित हूँ |
| नृपतिः | राजा | राजा |
| मार्जारी | बिडाली | बिल्ली |
| पाञ्चाली | द्रौपदी | द्रौपदी |

## अभ्यासः

१. **निम्नलिखितपदानाम् उच्चारणं कुरुत -**

मकारोऽन्ते, कोऽसौ, शोभितोऽस्मि, पक्षैरलङ्कृतः, तवाप्यस्ति, द्विजिह्वा, कृतिर्न यत्नः।

२. **श्लोकान् सस्वरं गायत।**

३. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत -**

(क) कस्य राज्यं सर्वश्रेष्ठम् ?

(ख) राष्ट्रियः विहङ्गः कः अस्ति ?

(ग) पाञ्चाली कस्याः सञ्ज्ञा अस्ति ?

(घ) वाल्मीकिः कस्य गायकः ?

(ङ) कः मौनेन जीवति ?

४. **यथायोग्य सुमेलयत -**

| | |
|---|---|
| (अ) सर्वश्रेष्ठं यस्य राज्यम् | यदि जानासि तद्वद। |
| (आ) राष्ट्रियःविहङ्गश्चास्मि | नृत्यं पश्यन्ति मे जनाः। |
| (इ) तवाप्यस्ति ममाप्यस्ति | अङ्गम् आलिङ्गति स्वयम्। |
| (ई) कृष्णमुखी न मार्जारी | वद कोऽसौ जनप्रियः । |
| (उ) नास्ति पादद्वयं गाढम् | द्विजिह्वा न च सर्पिणी । |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



५. **उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्त कथनानां समक्षं 'न' इति लिखत –**

**यथा–** वाल्मीकिः रामायणस्य गायकः अस्ति। आम्

(क) राष्ट्रियो विहङ्गः मयूरः नास्ति । ..................

(ख) मयूरः शिखण्डेन शोभितो न भवति। ..................

(ग) सर्पिणी द्विजिह्वा भवति । ..................

(घ) रामस्य राज्यं सर्वश्रेष्ठम् आसीत्। ..................

(ङ) वृक्षः मौने न जीवति । ..................

६. **पदेषु सन्धिविच्छेदं कुरुत –**

(क) तस्यादिः .................. + ..................

(ख) ममापि .................. + ..................

(ग) नास्ति .................. + ..................

(घ) चास्मि .................. + ..................

(ङ) रेफादौ .................. + ..................

(च) मकारान्ते .................. + ..................

७. **अधोलिखितानां पदानां लिङ्गं विभक्तिं वचनं च लिखत –**

| पदम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – शिखण्डेन | पुँल्लिङ्गम् | तृतीया | एकवचनम् |
| (क) राष्ट्रियः | ............... | ............... | ............... |
| (ख) नृत्यम् | ............... | ............... | ............... |
| (ग) फलानाम् | ............... | ............... | ............... |
| (घ) पाञ्चाली | ............... | ............... | ............... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



८. **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -**

न , विना , सदा , पुन:, च

(क) असत्यवचनं ...............................कथनीयम्।

(ख) प्रतिदिनं दन्तधावनं स्नानं..................... कुर्यात्।

(ग) जलं ..............................जीवनं न सम्भवति।

(घ) छात्रा: .................................शिक्षकं नमन्ति।

(ङ) स्वपाठं........................................... पठ।

९. **क्रमवाचिशब्दैः रिक्तस्थानानि पूरयत -**

| | | | |
|---|---|---|---|
| यथा- | **प्रथमः दिनाङ्कः** | **प्रथमा सभा** | **प्रथमम् मित्रम्** |
| १ | प्रथम: | प्रथमा | प्रथमम् |
| २ | द्वितीय: | द्वितीया | .................... |
| ३ | .................... | तृतीया | .................... |
| ४ | .................... | चतुर्थी | .................... |
| ५ | पञ्चम: | .................... | .................... |
| ६ | .................... | .................... | षष्ठम् |
| ७ | सप्तम: | .................... | .................... |
| ८ | .................... | .................... | अष्टमम् |
| ९ | नवम: | .................... | .................... |
| १० | .................... | दशमी | .................... |
| ११ | एकादश:........... | .................... | .................... |
| १२ | .................... | द्वादशी | .................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | | |
|---|---|---|---|
| १३ | त्रयोदशः | .................... | .................... |
| १४ | .................... | .................... | चतुर्दशम् |
| १५ | पञ्चदशः | .................... | .................... |
| १६ | .................... | षोडशी | .................... |
| १७ | .................... | .................... | .................... |
| १८ | .................... | .................... | .................... |
| १९ | नवदशः | .................... | .................... |
| २० | विंशः | विंशी | विंशम् |


**१०. निम्नवाक्येषु प्रथमद्वितीयतृतीयादिक्रमवाचिशब्दानां प्रयोगं कृत्वा पूरयत –**

(क) विश्वप्रसिद्धं .................... ब्रह्ममन्दिरं पुष्करे अस्ति।


(ख) हे देवकि! तव .................. पुत्रः कंसस्य कालः भविष्यति।

(ग) ज्ञानं मनुष्यस्य .................नेत्रम् अस्ति।


**११. चित्रं दृष्ट्वा रिक्तस्थानानि पूरयत –**



(१) **प्रथमं** फलम् आम्रम् ।



(२) ............फलं सेवफलम्




(३) ..................फलं कदलीफलम्




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





(४) .............फलं दाडिमफलम्



(५) ..........फलं नारङ्गफलम्



(६) ...........फलम् अलीचिकाफलम्

## योग्यता-विस्तारः

**१. इतोऽपि ज्ञानं वर्धयितुं एताः प्रहेलिकाः पठामः।**

१. नान्नं फलं वा खादामि, न पिबामि जलं क्वचित् ।
चलामि दिवसे रात्रौ, समयं बोधयामि च ।




घटी

२. मुखं कृष्णं वायुः क्षीणः, मञ्जूषायां च संस्कृतम् ।
घर्षणं मे दहयत्याशु रसवत्यां वसाम्यहम् ।।



अग्निपेटिका

३. एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः।
क्षीयते वर्धते चैव, न समुद्रो न चन्द्रमाः।



सूचिका




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




४. सुप्तोऽपि नेत्रे न निमीलयामि, जलस्य मध्ये निवसामि नित्यम्।
स्वजातिजीवा मम भोजनानि, वदन्तु मान्याः! मम नामधेयम्।।




मत्स्यः

५. यानस्याङ्गं हरेः शस्त्रं चिह्नं भारतभूयते।
चलन्तं वर्तुलाकारं, यो जानाति स पण्डितः।।



मयूरः

६. मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वतः।
बलिष्ठोऽस्मि भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः।।



गजः

## २. आगच्छत, क्रीडामः

* शिक्षकःकर्गद–चिटिकासु विविधानां वस्तूनां जन्तूनां फलानां पुष्पाणां वा नामानि लिखित्वा स्वपार्श्वे गोपयित्वा स्थापयेत्।

छात्राः मण्डले उपविशेयुः ।

सर्वप्रथमं शिक्षकः छात्रान् सूचयेत् – अहम् एतासु चिटिकासु एकाम् एकां चिटिकां स्वीकरिष्यामि चिटिकायां कस्यापि वस्तुनः जन्तोः फलस्य, पुष्पस्य वा नाम लिखितम् अस्ति ।यूयम् कल्पनां कृत्वा वदत यत् तत्र किं लिखितम् अस्ति ।'' छात्राः कल्पनां कृत्वा अनेकानि नामानि वदिष्यन्ति ।यदि कोऽपि छात्रः चिटिकायां लिखितं नाम वदति, तर्हि तस्मै वर्धापनानि दातव्यानि ।

यदि कोऽपि छात्रः चिटिकायां लिखितं नाम वक्तुं न शक्नुयात्, तर्हि शिक्षकः छात्रेभ्यः सङ्केतं करोति । सङ्केतरूपेण शिक्षकः तस्य वस्तुनः विशेषताः वदेत्, यस्य नाम चिटिकायां लिखितम् अस्ति ।यथा अत्र खगस्य नाम अस्ति।

छात्राः सङ्केतं प्राप्य पुनः प्रयासं करिष्यन्ति ।यदि विशेषताः श्रुत्वा अपि छात्राः नामकथने असमर्थाः भवन्ति, तर्हि शिक्षकः नाम्नः प्रथमाक्षरं वदेत् ।प्रथमाक्षरं ज्ञात्वा छात्राः पुनः प्रयासं करिष्यन्ति, अपेक्षितं नाम वदिष्यन्ति एव ।यथा तस्य शब्दस्य प्रथमाक्षरं ककारः अस्ति। छात्राः पुनरपि उत्तरं वक्तुं प्रयत्नं करिष्यन्ति।उत्तरम् आगच्छेदेव अनागते शिक्षकः अन्ते उत्तरं वदेत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चतुर्दशः पाठः
१४

# आपत्प्रबन्धम्

( इकारान्तस्त्रीलिङ्गम्, नपुसंकलिङ्गञ्च )



धरण्यां प्रकृत्याः प्रकोपेन अकस्माद् घटना घटते यया घटनया धनहानिः एव न अपितु जनहानिः अपि भवति। अकस्माद् घटितासु भूकम्पः, ज्वालामुखीस्फोटः, जलाप्लावः, अनावृष्टिः, हिमस्खलनम्, करकपातः, अग्निज्वालः, शीताघातः, मेघस्फोटः इत्यादिघटनाः प्राकृतिक आपदारूपेण ज्ञायन्ते।

एताभिः आपदाभिः सर्वेऽपि प्राणिनः प्रभाविताः भवन्ति। एताषां द्वारा पूर्वं महज्जनहानिः धनहानिश्च जाता। यथा –

। तमिलनाडुराज्ये भयङ्करचक्रवातस्य ताण्डवम्।

। तत्रैव कुम्बकोणस्थाने अग्निदाहेन त्रिनवतेः बालानां सक्रन्दनमृत्युः जातः।

। सौराष्ट्रे भुजक्षेत्रे भूकम्पस्य विनाशकारि दृश्यम्।

। उत्तराखण्डराज्ये केदारनाथे जलाप्लावनस्य प्रकोपेन पञ्चसहस्त्रजनाः कालकवलिताः जाताः।


राजस्थाने अनावृष्ट्या सह वारं वारं प्रतिद्वन्द्वं वयं स्मरामः एव। एताः आपदाः विकासगतिं रुन्धन्ति। एतासाम् आपदानाम् अनुसन्धानस्य अनुमानस्य च अपेक्षया रक्षणोपायाः एव श्रेयस्कराः भवन्ति। वयं मिलित्वा एतान् उपायान् कुर्मः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





१. सर्वे मिलित्वा रक्षणकार्येषु प्रवृत्ता भवेम ।

२. धैर्यसाहसाभ्यां स्वविवेकेन परितः स्थितजनानां रक्षा कर्तव्या ।

३. आहतान् आदौ चिकित्सालयं नयाम ।

४. नवभवनादिनिर्माणकाले भवननिर्माणनियमान् कठोरतया पालयाम

५. विद्यालयेषु महाविद्यालयेषु च आपत्प्रबन्धन-शिक्षाप्रशिक्षणं च अनिवार्यं कर्तव्यम् ।

६. प्रतिग्रामम् आपत्शमनदलं भवेत् ।

७. आपत्प्रबन्धने उत्कृष्टसहयोगकर्तृणाम् उत्साहवर्धनं कर्तव्यम् ।

८. आपदानां भेदाः रक्षणोपायाः च सार्वजनिकस्थलेषु लेखितव्याः ।

९. वयं सर्वेऽपि मिलित्वा ईश्वरं प्रार्थयामः यद् स आपदाप्रकोपाद् अस्मान् रक्षतु ।

१०. सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेद् ।





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| धरण्याम् | पृथिव्याम् | धरती पर |
| घटते | घटितं भवति | घटित होती है |
| यया | यस्याः कारणेन | जिससे |
| स्फोटः | विस्फोटः | फटना |
| जलाप्लावः | प्लावनम् | बाढ़ |
| अनावृष्टिः | वर्षायाः अभावः | अकाल |
| करकपातः | वर्षोपलपातः | ओला वृष्टि |
| अग्निप्रज्वालः | अग्निदाहः | आग लगना |
| शीताघातः | शीतप्रकोपः | शीतलहर |
| मेघस्फोट | मेघस्य स्फोटनम् | बादल का फटना |
| ज्ञायन्ते | अधिगम्यन्ते | जानी जाती है |
| अभवत् | जातम् | हुई |
| चक्रवातः | झञ्झावातः | तूफान |
| प्रतिद्वन्द्वम् | संघर्षः | मुकाबला |
| रक्षणोपायाः | रक्षायाः उपायाः | रक्षा के उपाय |
| श्रेयस्कराः | प्रशंसनीयाः | प्रशंसनीय |
| मिलित्वा | एकीभूय | मिलकर के |
| परिस्थितः | परितः विद्यमानः | चारो ओर विद्यमान |
| आहतान् | पीडितान् | घायलों का |
| आदौ | आरम्भे | प्रारंभ में |
| भद्राणि | कल्याणानि | हित |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

१. **निम्नलिखितपदानाम् उच्चारणं कुरुत -**

जलाप्लावः, हिमस्खलनम्, वर्षोपलपातः, मेघस्फोटः, प्रतिद्वन्द्वम्, अगणयित्वा, रक्षणोपायाः

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) प्राकृतिकापदया कीदृशी हानिः भवति?

(ख) अकस्माद् घटितानां घटनानां नामानि लिखत।

(ग) सौराष्ट्रे कस्मिन् क्षेत्रे भूकम्पः जातः?

(घ) राजस्थाने कया सह प्रतिद्वन्द्वः भवति ?

(ङ) आहतान् आदौ कुत्र नयामः ?

३. **रिक्तस्थानानि पूरयत -**

(क) तमिलनाडुराज्ये भयङ्कर .....................ताण्डवं जातम्।

(चक्रवातस्य / भूकम्पस्य )

(ख) उत्तराखण्डे केदारनाथे जलाप्लावनेन ...........जनाः मृताः। (५००० / ७००० )

(ग) आपदाः विकासगतिं .........................................। ( वर्धयन्ति / रुन्धन्ति )

(घ) रक्षणोपायाः .........................................भवन्ति। ( श्रेयस्कराः / हानिकराः )

(ङ) आपत्प्रबन्धने उत्कृष्टसहयोगकर्तृणाम् .............करणीयम्।

(उत्साहदमनम् / उत्साहवर्धनम् )

४. **अधोलिखित पदेषु निर्दिष्टविभक्तिवचने योजयित्वा रूपाणि लिखत -**

| | पदानि | विभक्तिः | वचनम् | रूपम् |
|---|---|---|---|---|
| यथा- | प्रकृतिः | षष्ठी | एकवचनम् | प्रकृत्याः |
| | धनहानिः | षष्ठी | एकवचनम् | .................. |
| | त्रिनवतिः | षष्ठी | एकवचनम् | .................. |
| | वारि | षष्ठी | एकवचनम् | .................. |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



५. **कोष्ठके प्रदत्तस्य शब्दस्य निर्दिष्टरूपेण रिक्तस्थानानि पूरयत -**

(क) ........................सर्वं साध्यं भवति। (मति-तृतीया- एकवचनम्)

(ख) तत्र ........................समूहः अस्ति। (युवति- षष्ठी- एकवचनम्)

(ग) आचार्यस्य ...............महत्वपूर्णाः सन्ति। (उक्ति- प्रथमा- बहुवचनम्)

(घ) ...............................व्यजनम् अस्ति। (छदि- सप्तमी- एकवचनम् )

(ङ) कालिदासस्य सप्त प्रसिद्धाः ...............सन्ति । (कृति- प्रथमा- बहुवचन)

## योग्यता-विस्तारः





मानवैः भूमेः यद् दोहनं क्रियते यथा तैलकूपेभ्यः तैलस्य दोहनम्, पर्वतानां खननं कृत्वा यन्त्रैः कर्तयित्वा विस्फोटं च कृत्वा बहुमूल्यप्रस्तराणां प्राप्तिः , अत्यधिकमात्रायां भूमेः दोहनम् इत्यादिकम्।

जलबन्धानां निर्माणं निर्बाधगत्या वृक्षाणां कर्तनं, बहुभूमिकभवनानां निर्माणं वातानुकूलितयन्त्राणां च अधिकप्रयोगः प्राकृतिक-आपदानां प्रमुखानि कारणानि सन्ति । मानवः यदा-यदा प्रकृतेः विरुद्धम् आचरितवान् तदा-तदा तेन विनाशकारिणः परिणामाः प्राप्ताः। अतः प्रकृतेः अनुगुणं जीवनं वर्तमानस्य आवश्यकता अस्ति ।




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पञ्चदशः पाठः १५

# डॉ. ए.पी.जे. अब्दुलकलामः

( वृद्धिः, अयादिः च )



डॉ. ए.पी.जे. अब्दुलकलामवर्यः बाल्यकालाद् एव मेधावी आसीत्। सर्वे शिक्षकाः तं स्निह्यन्ति स्म। यदा कलामः द्वितीयकक्षायां पठति स्म तदा स्वकक्षां त्यक्त्वा बहिः गतः इति ज्ञात्वा तस्य शिक्षकः क्रुद्धः अभवत्।

अपरस्मिन् दिवसे सः तम् अतर्जयत् । तत्पश्चात् सः गणितविषयस्य कक्षां कदापि न त्यक्तवान् परीक्षापरिणामे च शतप्रतिशतम् अङ्कान् गणितविषये प्राप्तवान् । प्रार्थनासभायामपि शिक्षकः तद् वृतान्तं सर्वेभ्यः छात्रेभ्यः श्रावितवान् पुनश्च उक्तवान् "एषः बालकः एतस्य विद्यालयस्य महान् विद्यार्थी भविष्यति।"

पं. शिवसुब्रह्मण्य अय्यरः कलामं विज्ञानविषयं पाठयति स्म। सः ज्ञातवान् यत् कलामे असाधारणी प्रतिभा अस्ति। अनुकूलः परिवेशः मिलति चेत् सः बालकः महापुरुषः भविष्यति इति विचार्य वारं-वारं सः तं प्रेरयति वदति च "कलाम ! अहं त्वां सुशिक्षितं महापुरुषं निर्मातुम् इच्छामि।" सः शिक्षकः तं बहुवारं स्वगृहम् आहूय स्वेन सह पाकशालायाम् उपावेश्य भोजनं कारितवान् । सः एव अब्दुलकलामः महान् वैज्ञानिकः प्रक्षेपास्त्रजनकः राष्ट्रनायकश्च अभवत् ।

कलामवर्यस्य शिक्षाप्रदकथनानि –

१. स्वस्य प्रथमविजयात्परं कदापि विश्रामः न करणीयः यतोहि अपरस्मिन् अवसरे यदि भवान् असफलः भवेत् तर्हि पूर्वापेक्षया अधिके जनाः एतद् वक्तुं सिद्धाः स्युः यत् प्रथमविजयः केवलं भाग्याधीनः आसीत्।

२. अस्माकं सर्वेषां समीपे समाना प्रतिभा नास्ति परम् अस्माकं समीपे प्रतिभां विकासयितुं समानाः अवसराः सन्ति ।

३. स्वप्नाः ते न सन्ति यान् वयं शयानाः पश्यामः स्वप्नास्तु ते सन्ति ये अस्माकं शयने विघ्नान् कुर्वन्ति।

४. यदि भवान् सूर्यः इव प्रकाशमानः भवितुम् इच्छति तर्हि पूर्वं तद्वत् ज्वलेत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



५. सर्वे चटकाः वृष्टिसमये कमपि आलम्ब्य वृष्टेः जलात् स्वान् (आत्मनः) रक्षन्ति परं श्येनः मेघानाम् उपरि उड्डीय वृष्टिजलात् स्वं रक्षति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| मेधावी | बुद्धियुक्तः | बुद्धिमान् |
| अतर्जयत् | क्रोधम् अकरोत् | फटकारा |
| स्निह्यन्ति | स्नेहं कुर्वन्ति | स्नेह करते हैं। |
| त्यक्त्वा | त्यागं कृत्वा | त्याग करके |
| अपरस्मिन् | अन्यस्मिन् | अन्य में |
| उक्तवान् | अकथयत् | कहा |
| आलम्ब्य | आलम्बनं कृत्वा | सहारा लेकर |

## अभ्यासः

१. **निम्नलिखितपदानाम् उच्चारणं कुरुत -**

अपरस्मिन्, तत्पश्चात्, वृत्तान्तम्, श्रावितवान्, उपविश्य, पूर्वापेक्षया, भाग्याधीनम्।

२. **निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) बाल्यकालात् एव मेधावी कः आसीत्?

(ख) सर्वे शिक्षकाः कं स्निह्यन्ति स्म ?

(ग) रामकृष्णःअय्यरः कक्षायां किं पाठयति स्म?

(घ) कलामं विज्ञानविषयं कः पाठयति स्म?

(ङ) शिक्षकः कलामं कुत्र आहूय भोजनं कारितवान्?

(च) कदा विश्रामः न करणीयः ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### ३. रेखाङ्कितपदानि आधारिकृत्य प्रश्ननिर्माणं कुरुत -

(क) परीक्षापरिणामे शतप्रतिशतम् अङ्कान् गणित विषये प्राप्तवान् ।

(ख) शिक्षकः तं स्वेन सह पाकशालायाम् उपवेश्य भोजनं कारितवान्।

(ग) अस्माकं सर्वेषां समीपे समाना प्रतिभा नास्ति ।

(घ) भवान् सूर्य इव प्रकाशमानः भवितुं इच्छति ।

(ङ) श्येनः मेघानाम् उपरि उड्डीय वृष्टिजलात् स्वं रक्षति।

### ४. विभक्तिं वचनम् च लिखत -

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | विद्यालयस्य | .................. | .................. |
| (ख) | कथनानि | .................. | .................. |
| (ग) | कलामे | .................. | .................. |
| (घ) | पाकशालायाम् | .................. | .................. |
| (ङ) | मेघानाम् | .................. | .................. |

## योग्यता-विस्तारः

### १. भारतस्य प्रमुखवैज्ञानिकाः

१. आर्यभट्टः - अयं प्रसिद्धः वैज्ञानिकः । अस्य विशुद्धवैज्ञानिकरचनायाः नाम आर्यभटीयम् अस्ति।

२. वराहमिहिरः-बृहत्संहिता अस्य प्रसिद्धा कृतिः।''वेदान् अधीत्य पञ्चाङ्गस्य परिवर्तनं विधेयम्'' इति अस्य मतम् अस्ति ।

३. जगदीशचन्द्रवसुः-अयं हि कैस्टोग्राफनामकं यन्त्रम् आविष्कृतवान् । वृक्षेषु अपि स्पन्दनादिकं भवति इति एषः उदघोषयत् ।

४. प्रो. बीरबलसहानीः-वनस्पतेः जगतः विकासस्य तत्कालीनं भूगोलस्य वातावरणविषये आविष्कारं कृतवान् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



२. **सन्धिं जानीम -**

**अयादिसन्धिः -** ए, ओ, ऐ, औ वर्णेभ्यः (स्वरेभ्यः) परं कोऽपि स्वरः ( अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ )आगच्छेत् तदा

ए स्थाने = अय्

ओ स्थाने = अव्

ऐ स्थाने = आय्

औ स्थाने = आव् भवति।

**उदाहरणानि -**

ने + अनम् = नयनम्

नै + अकः = नायकः

भो + अनम् = भवनम्

पौ + अकः = पावकः


**वृद्धि सन्धिः -** अवर्णस्य पश्चात् ए/ऐ द्वयोः कोऽपि वर्णः भवति तदा द्वयोः(अ + ए/ अ +ऐ) वर्णयोः स्थाने ऐकारः(ऐ) भवति। तथा च अवर्णस्य पश्चात् ओ/औ द्वयोः कोऽपि वर्णः भवति तदा द्वयोः(अ + ओ/ अ +औ) वर्णयोः स्थाने औकारः(औ) भवति।

**उदाहरणानि -**

सदा + एव = सदैव

महा + औषधि = महौषधिः

तण्डुल + ओदनम् = तण्डुलौदनम्



**डॉ. राजेन्द्रप्रसादः भारतस्य प्रथमः राष्ट्रपतिः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

षोडशः पाठः
१६

# सूक्तयः
( अव्ययानि )

१. **सत्यं वद धर्मं चर।**

**भावार्थः** त्वं सर्वदा अपि सत्यवचनानि एव वद। धर्मानुसारम् आचरणं कुरु ।

२. **वद वाक्यं शुभं सदा।**

**भावार्थः** त्वं सर्वदा एव शुभकरं प्रीतिकरं कर्णप्रियं च वाक्य वद ।

३. **नहि सत्यात् परं धनम्।**

**भावार्थः** सर्वश्रेष्ठं धनं सत्यम् एव अस्ति । अस्मिन् संसारे सत्यात् श्रेष्ठं धनं किमपि नास्ति।

४. **हितं मनोहारि च दुर्लभं वचः।**

**भावार्थः** यद्वचनं हितकरम् अस्ति कर्णप्रियं चापि अस्ति। तादृशं वचनं एकत्र न मिलति । अर्थात् यद्वचनं हितकरं भवति प्रायः तद्वचनं मनःप्रियं न भवति। अतः हितकरं वचनं सर्वदापि ग्राह्यम् अस्ति । तत्र मनोहरस्य अपेक्षा न करणीया।

५. **कीर्तिः यस्य सः जीवति।**

**भावार्थः** यः मनुष्यः उत्तमानि कार्याणि कृत्वा यशः अर्जितवान् तस्य एव जीवनं सार्थकम् अस्ति। यस्य यशः नास्ति तस्य जीवनं मृत्युसमः एव अस्ति अतः सत्कार्याणि कुर्वन्तः वयं यशः अर्जयेम।

६. **सङ्घे शक्तिः कलौ युगे।**

**भावार्थः** इदं युगं कलियुगम् अस्ति। अस्मिन् कलियुगे सङ्घटने एव शक्तिः भवति। सङ्घटिताः जनाः सर्वं कार्यं साधयन्ति, असङ्घटिताः न। अतः वयं सङ्घटिताः भवेम।

७. **सन्तोषः परमं सुखम्।**

**भावार्थः** सर्वोत्तमं सुखं सन्तोषः एव अस्ति। एतत् सुखं यस्य समीपे भवति सः सर्वदा सुखी भवति। अतः वयं सन्तुष्टाः भवाम।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



८. **शरीरमाद्यं खलु धर्मसाधनम्।**

**भावार्थः** यदि वयं धर्मानुसारम् आचरणं कृत्वा पुण्यानि अर्जयितुम् इच्छामः तर्हि प्रथमं शरीरस्य रक्षणम् आवश्यकम्। शरीरेण विना वयं धर्माचरणेन पुण्यार्जनं कथं करिष्यामः।

९. **जलदुरुपयोगः महत्पापम्।**

**भावार्थः** जलस्य दुरुपयोगं कृत्वा तस्य नाशः, जीवनस्य एव नाशः अस्ति। अतः एतत् महत्पापम् एव अस्ति।

१०. **अमृतमेव गवां क्षीरम्।**

**भावार्थः** गवां दुग्धम् अमृततुल्यं अस्ति यतोहि अन्येषां प्राणिनां दुग्धस्य अपेक्षया गोः दुग्धं बहुगुणयुक्तं स्वास्थ्यवर्धकं च भवति।

११. **उदारचरितानां तु वसुधैव कुटुम्बकम्।**

**भावार्थः** उदारचिन्तनशीलाः जनाः समस्तां पृथिवीं स्वकुटुम्बसमानाम् एव चिन्तयन्तीति ते अन्येषु भेदं न गणयन्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| वद | त्वं कथय | बोलो |
| चर | त्वम् आचरणं कुरु | आचरण करो |
| सत्यात् | सत्यभाषणात् | सत्य से |
| मनोहारि | रुचिकरम् | मन को प्रिय लगने वाला |
| कीर्तिः | यशः | यश |
| सङ्घे | सङ्घटने | संगठन में |
| कलौ युगे | अस्मिन् युगे | कलयुग में |
| परमम् | श्रेष्ठम् | श्रेष्ठ |
| आद्यम् | प्रथमम् | पहला |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| गवाम् | धेनूनाम् | गायों का |
| क्षीरम् | दुग्धम् | दूध |
| वसुधैव | पृथ्वी एव | पृथ्वी ही |
| कुटुम्बकम् | परिवारः | परिवार |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत -**

न हि सत्यात्, सङ्घे शक्तिः, शरीरमाद्यम्, जलदुरुपयोगः, उदारचरितानां, कुटुम्बकम्।

२. **अधोलिखितवाक्यानां सस्वरगानं कुरुत -**

(क) न हि सत्यात् परं धनम्,

(ख) शरीरमाद्यं खलु धर्मसाधनम्।

(ग) उदारचरितानां तु वसुधैव कुटुम्बकम्।

(घ) जलदुरुपयोगः महत्पापम्।

(ङ) सङ्घे शक्तिः कलौ युगे।

(च) अमृतमेव गवां क्षीरम्।

३. **एकेन शब्देन उत्तरत -**

(क) कीदृशं वाक्यं वद ?

(ख) परमं धनं किम् अस्ति?

(ग) संसारेऽस्मिन् कः जीवति ?

(घ) परमं सुखम् कः अस्ति?

(ङ) गवां क्षीरं कीदृशम् अस्ति ?

(च) कस्य दुरुपयोगः महत्पापम् अस्ति?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**४. अधोलिखितशब्दान् चित्वा रिक्तस्थानानि पूरयत -**

शुभम् , दुर्लभम् , परमम् , खलु, वसुधैव

(क) उदारचरितानां तु ........................... कुटुम्बकम्।

(ख) शरीरमाद्यं ............................ धर्मसाधनम्।

(ग) सन्तोषः .....................सुखम्।

(घ) हितं मनोहारि च ......................... वचः।

(ङ) वद वाक्यं ............... सदा।

**५. उपयुक्तकथनस्य पुरतः 'आम्' अनुपयुक्तस्य च पुरतः 'न' इति लेख्यम् -**

(क) वद वाक्यं शुभं सदा। [ ]

(ख) हितं मनोहारि च न दुर्लभं वचः। [ ]

(ग) सङ्घे शक्तिः कलौ युगे। [ ]

(घ) शरीरमाद्यं न खलु धर्मसाधनं। [ ]

(ङ) अमृतमेव गवां क्षीरम्। [ ]

**६. पर्यायवाचिशब्दान् लिखत -**

कीर्तिः ....................................

जलम् ....................................

वचः ....................................

शक्तिः ....................................

वसुधा ....................................

**७. अधोलिखितानां शब्दानां विलोमपदानि लिखत -**

(क) सत्यम् ....................

(ख) शुभम् ....................

(ग) कीर्तिः ....................

(घ) सुखम् ....................

(ङ) धर्मम् ....................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः

१. **एतान् अपि पठाम -**

(१) सत्यमेव जयते नानृतम्।

(२) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

(३) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

(४) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

(५) आचारहीनं न पुनन्ति वेदाः।

२. **चित्रं दृष्ट्वा जानीम -**



पुरतः युवकस्य **पुरतः** दूरदर्शनम् अस्ति।

पृष्ठतः युवकस्य **पृष्ठतः** आसन्दः अस्ति।

### अव्ययपदानि

यथा - **यथा** राजा **तथा** प्रजाः । (भावार्थः -राजा प्रजाः च समाना एव )

यथा लता गायति तथा अन्यः गायकः न गायति। (भावार्थः - लता उत्तमं गायति इत्यर्थः)

वृक्षतः फलं पतति। प्रश्नः - **कुतः** फलं पतति?

एतत् मम गृहं । अहम् **इतः** विद्यालयं गच्छामि

सः युद्धं न कृतवान् **यतोहि** सः दुर्बलः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



शीघ्रम् वायुयानं **शीघ्रं** प्राप्नोति।

मन्दम् गजः **मन्दं** चलति।

उच्चैः सिंहः **उच्चैः** गर्जति।

**मा** चिन्तां कुरु

**वृथा** कालयापनं मास्तु।

पुष्पाणि **इतस्ततः** विकीर्णानि सन्ति।

युवकः भ्रमणार्थम् उद्यानं गच्छति।    प्रश्नः – युवकः **किमर्थम्** उद्यानं गच्छति ?




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सप्तदशः पाठः १७

# उदासीनाचार्यः श्रीचन्द्रः



शिष्यः (सिक्ख) सम्प्रदायस्य प्रतिष्ठापकस्य गुरुनानकदेवस्य सुपुत्रः श्रीचन्द्रः नवम्यां तिथौ भाद्रपदमासे शुक्लपक्षे १५५९ विक्रमाब्दे ( १४९४ ख्रीस्ताब्दे ) जन्म लब्धवान् । माता चास्य सुलक्षणवती सुलक्षणादेवी आसीत् । श्रीचन्द्रः बाल्याद् एव शिवः इव वीतरागः दानशीलः योगसाधनायां रतः आसीद् अतः समगुणत्वात् जनाः तं शिवस्य अवताररूपे भावयन्ति स्म। बालकस्य श्रीचन्द्रस्य मातामहः श्रीमूलचन्द्रः तं ''पक्खोका'' नामधेयं स्वग्रामम् अनयत् । तत्र सः त्रीणि वर्षाणि अवसत् ।

पण्डितः हरदयालुशर्मणा श्रीचन्द्रस्य यज्ञोपवितसंस्कारः सम्पादितः । कश्मीरवासिनः पण्डितपुरूषोत्तम कौलात् शिक्षां प्राप्य शीघ्रमेव विद्यायां पारङ्गतः भूत्वा सः श्रीचन्द्रमौली नाम्ना ख्यातः जातः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अध्ययनकाले चतुर्दशवर्षीयः श्रीचन्द्रः विद्यागर्वेण ग्रसितं पं. सोमनाथत्रिपाठिनं शास्त्रार्थे विजित्य वैदिकधर्मस्य प्रचारार्थं सः सम्पूर्णभारतस्य विविध-स्थानेषु भ्रमणम् अकरोत् । धर्मं प्रति निष्ठाम् अपि स्थापितवान् । सः हुमायूं प्रजापालनस्य उपदेशं दत्त्वा सत्पथे आनयत् । सः महाराणाप्रतापं स्व गौरवमयिवंशपरम्परां स्मारयित्वा कर्तव्यपथे अग्रेसरं कृतवान् । श्रीमात्राशास्त्रम्, श्रीचन्द्रसिद्धान्तसागरः श्रीचन्द्रसिद्धान्तमञ्जरी, सिद्धान्त-पुचकर्म, रत्नपञ्चकर्मप्रभृतीन् ग्रन्थान् रचयित्वा मानवसेवायाः कार्यम् अकरोत् । आचार्यस्य श्रीचन्द्रस्य दार्शनिकाः सिद्धान्ताः विशेषरूपेण अनुसरणीयाः सन्ति । परमाचार्यश्रीचन्द्रस्य चत्वारः शिष्याः बालहासः, गोविन्ददेवः, पुष्पदेवः (फूलसाहब) कमलासनश्च अभवन् । एवं वैदिकधर्मप्रचारार्थं भारतीयसंस्कृतेः रक्षणार्थं राष्ट्रभक्ति-भावनायाः विकासाय पञ्चदेवोपासनायाः प्रचाराय अनवरतरूपेण कष्टानि सोढ्वा स्वजीवनस्य सार्थकतां साधितवन्तः। तस्य कार्याणि उपदेशाः च अद्यापि प्रासङ्गिका उपयोगिनः च सन्ति ।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सुलक्षणवती | शोभनलक्षणवती | सुन्दर लक्षणों वाली |
| बाल्याद् | बाल्यकालात् | बचपन से |
| वीतरागः | आसक्त्याः रहित | विना आसक्ति से |
| मातामहः | मातुः पिता | नाना |
| विद्यागर्वेण | विद्यायाः अभिमानेन | विद्या के अभिमान से |
| विजित्य | विजयं प्राप्य | विजय प्राप्त करके |
| स्मारयित्वा | स्मरणं कृत्वा | याद करके |
| अनुसरणीयाः | अनुसरणं करणीयाः | अनुसरण करने योग्य |
| रक्षणार्थं | रक्षार्थम् | रक्षा के लिये |
| अध्यापि | सम्प्रतिमपि | आज भी |
| सोढ्वा | सहनं कृत्वा | सहन करके |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभ्यासः

**१. निम्नपदानाम् उच्चारणं कुरुत –**

योगसाधनायाम्, समगुणत्वात्, मातामहः,

त्रीणिवर्षाणि, प्रचारार्थम्, राष्ट्रभक्तिभावनायाः

**२. एकवाक्येन उत्तरत –**

(क) सिक्खसम्प्रदायस्य प्रतिष्ठापकः कः ?

(ख) बाल्याद् एव शिवः इव वीतरागः दानशीलः कः आसीत् ?

(ग) बालकं श्रीचन्द्रं पक्खोका ग्रामं कः अनयत् ?

(घ) श्रीचन्द्रस्य यज्ञोपवीतसंस्कारः केन सम्पादितः ?

(ङ) विद्यागर्वेण ग्रसितः कः आसीत् ?

(च) श्रीचन्द्रः उपदेशं दत्त्वा कं सत्पथे आनयत् ?

**३. रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –**

(क) सः स्वधर्मं प्रति <u>निष्ठाम्</u> अपि स्थापितवान् ।

(ख) तस्य कार्याणि अद्यापि <u>प्रासङ्गिकानि</u> सन्ति ।

(ग) सः <u>वैदिकधर्मस्य</u> प्रचारार्थम् अनवरतरूपेण कार्यम् अकरोत् ।

(घ) तस्य माता सुलक्षणादेवी आसीत् ।

(ङ) सः बाल्याद् एव <u>योगसाधनायां</u> रतः आसीत् ।

(च) तस्य जन्म नवम्यां तिथौ <u>भाद्रपदमासे</u> शुक्लपक्षे अभवत् ।

**४. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –**

| यज्ञोपवीतसंस्कारः, पारङ्गतः, मानवसेवायाः, विद्यागर्वेण, निष्ठाम्। |
|---|

(क) सः अनेकान् ग्रन्थान् रचयित्वा .......................... कार्यम् अकरोत् ।

(ख) स्वधर्मं प्रति ...................... अपि स्थापितवान् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



(ग) पं. हरदयालुशर्मणा चन्द्रस्य .................................. सम्पादितः ।

(घ) पं. पुरूषोत्तमकौलात् शिक्षां प्राप्य, विद्यायां ................... अभवत् ।

(ङ) श्रीचन्द्रः................ ग्रसितं पं. सोमनाथत्रिपाठिनं शास्त्रार्थे जितवान् ।

**५. विलोमपदानि सुमेलयत –**

| | | |
|---|---|---|
| (क) | जन्म | दत्त्वा |
| (ख) | प्राप्य | मृत्युः |
| (ग) | विद्यायाम् | कुमार्गे |
| (घ) | वीतरागः | अविद्यायाम् |
| (ङ) | सत्पथे | विस्मृत्य |
| (च) | स्मारयित्वा | रागयुक्तः |

**६. अधोलिखितपदेषु यथापेक्षितं सन्धिं/विच्छेदं कुरुत –**

| | | | | | |
|---|---|---|---|---|---|
| (क) | शीघ्रम् | + | एव | = | ............... |
| (ख) | ............... | + | ............... | = | प्रतिष्ठार्थम् |
| (ग) | शास्त्र | + | अर्थः | = | ............... |
| (घ) | ............... | + | ............... | = | रक्षणार्थम् |
| (ङ) | अद्य | + | अपि | = | ............... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योग्यता-विस्तारः



**गुरुः नानकदेवः**

श्रीगुरुनानकदेवः निष्कामकर्मयोगी अनन्यनिर्गुणभक्तः सन्तगुरुश्चासीत्। नानकदेवस्य जन्म तलवण्डी नाम्नि स्थाने (साम्प्रतं पाकिस्ताने) जातम्। तत् स्थानं 'ननकाना-साहिब, इति नाम्ना अपि उच्यते। अस्य पितुः नाम कालू मेहता मातुश्च नाम तृप्ता आसीत्। बाल्यकालाद् एव विलक्षणः असाधारणप्रतिभश्च आसीत्। ग्राम्यपरिवेशे एव वसन् अयं संस्कृत-उर्दू- पारसीकभाषाः अधीतवान्।

नानकदेवस्य प्रमुखाः सिद्धान्ताः एवं सन्ति -

- गुरुकृपयाः, परमात्मकृपया सदाचरणेन च सर्वं प्राप्तुं शक्यम्।
- मानवकल्याणस्य एकः एव मार्गः सत्यम् अस्ति। अतः सत्यस्य पालनम् एव सर्वदा करणीयम्।
- धर्मेषु पाखण्डः, आडम्बरः मिथ्याचारश्च न भवेयुः।
- समाजे भेदभावाः दूरीकरणीयाः।
- ईश्वरेच्छा एव बलीयसी। अतः यः ईश्वरेच्छानुसारं कार्यं करोति एवं दुर्गमपथि अपि साफल्यं प्राप्नोति।
- विद्वान् सः एव अस्ति यः परोपकारे विश्वकल्याणे च संलग्नः अस्ति।

'गुरुग्रन्थसाहिब' इति नामके पवित्र-ग्रन्थे नानकदेवस्य पदानां सङ्ग्रहः अस्ति। आध्यात्मिक-सामाजिक-नैतिक-मूल्यानां सम्बन्धे नानकदेवस्य वाणीव्यवहारश्च सदैव अनुकरणीयौ स्तः। नानकदेवेन प्रवर्तित-परम्परायां दश गुरवः अभवन्। अन्तिमः गुरुः श्री गोविन्दसिंहः आसीत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# परिशिष्टम्

## १. शब्दरूपाणि

### मति-शब्दः ( बुद्धि ) इकारान्तस्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै/ मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः/ मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः/ मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्/मतौ | मत्योः | मतिषु |
| सम्बोधनम्! | हे मते! | हे मती ! | हे मतयः! |

### वारि शब्दः ( जल ) इकारान्तनपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणी | वारिणोः | वारिषु |
| सम्बोधनम् | हे वारि! | हे वारिणी! | हे वारिणि! |

### नदी शब्दः ( नदी ) ईकारान्तस्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | | |
|---|---|---|---|
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधनम् | हे नदि ! | हे नद्यौ ! | हे नद्यः ! |

## तत् शब्दः ( वह ) पुँल्लिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## तत् शब्दः ( वह ) स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### तत् शब्दः ( वह ) नपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

### एतत् शब्दः ( यह ) पुँल्लिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम् | एतौ | एतान् |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

### एतत् शब्दः ( यह ) स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम् | एते | एताः |
| तृतीया | एतया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | | |
|---|---|---|---|
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु |

### एतत् शब्दः ( यह ) नपुसंकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

### किम् शब्दः ( कौन ) पुँल्लिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

### किम् शब्दः ( कौन ) स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | | |
|---|---|---|---|
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

### किम् शब्दः ( कौन ) नपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

### यत् शब्दः ( जो ) पुँल्लिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### यत् शब्दः ( जो ) स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पञ्चमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |

### यत् शब्दः ( जो ) नपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

## २. धातुरूपाणि

### कृ धातु लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमः पुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमः पुरुषः | करोमि | कुर्वः | कुर्मः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमः पुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमः पुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमः पुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमः पुरुषः | अकरवम् | अकुर्व | अकुर्म |

### इष् धातु लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | इच्छति | इच्छतः | इच्छन्ति |
| मध्यमः पुरुषः | इच्छसि | इच्छथः | इच्छथ |
| उत्तमः पुरुषः | इच्छामि | इच्छावः | इच्छामः |

### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | एषिष्यति | एषिष्यतः | एषिष्यन्ति |
| मध्यमः पुरुषः | एषिष्यसि | एषिष्यथः | एषिष्यथ |
| उत्तमः पुरुषः | एषिष्यामि | एषिष्यावः | एषिष्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| मध्यमः पुरुषः | ऐच्छः | ऐच्छतम् | ऐच्छत |
| उत्तमः पुरुषः | ऐच्छम् | ऐच्छाव | ऐच्छाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विकस् धातु लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | विकसति | विकसतः | विकसन्ति |
| मध्यमः पुरुषः | विकससि | विकसथः | विकसथ |
| उत्तमः पुरुषः | विकसामि | विकसावः | विकसामः |

## लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | विकसिष्यति | विकसिष्यतः | विकसिष्यन्ति |
| मध्यमः पुरुषः | विकसिष्यसि | विकसिष्यथः | विकसिष्यथ |
| उत्तमः पुरुषः | विकसिष्यामि | विकसिष्यावः | विकसिष्यामः |

## लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | व्यकसत् | व्यकसताम् | व्यकसन् |
| मध्यमः पुरुषः | व्यकसः | व्यकसतम् | व्यकसत |
| उत्तमः पुरुषः | व्यकसम् | व्यकसाव | व्यकसाम |

## कृष् धातु लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | कर्षति | कर्षतः | कर्षन्ति |
| मध्यमः पुरुषः | कर्षसि | कर्षथः | कर्षथ |
| उत्तमः पुरुषः | कर्षामि | कर्षावः | कर्षामः |

## लङ् लकार

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अकर्षत् | अकर्षताम् | अकर्षन् |
| मध्यमः पुरुषः | अकर्षः | अकर्षतम् | अकर्षत |
| उत्तमः पुरूषः | अकर्षम् | अकर्षाव | अकर्षाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### 'गै' धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | गायति | गायतः | गायन्ति |
| मध्यमः पुरुषः | गायसि | गायथः | गायथ |
| उत्तमः पुरुषः | गायामि | गायावः | गायामः |

### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | गास्यति | गास्यतः | गास्यन्ति |
| मध्यमः पुरुषः | गास्यसि | गास्यथः | गास्यथ |
| उत्तमः पुरुषः | गास्यामि | गास्यावः | गास्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अगायत् | अगायताम् | अगायन् |
| मध्यमः पुरुषः | अगायः | अगायतम् | अगायत |
| उत्तमः पुरुषः | अगायम् | अगायाव | अगायाम |

### 'जि' धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | जयति | जयतः | जयन्ति |
| मध्यमः पुरुषः | जयसि | जयथः | जयथ |
| उत्तमः पुरुषः | जयामि | जयावः | जयामः |

### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | जेष्यति | जेष्यतः | जेष्यन्ति |
| मध्यमः पुरुषः | जेष्यसि | जेष्यथः | जेष्यथ |
| उत्तमः पुरुषः | जेष्यामि | जेष्यावः | जेष्यामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अजयत् | अजयताम् | अजयन् |
| मध्यमः पुरुषः | अजयः | अजयतम् | अजयत |
| उत्तमः पुरुषः | अजयम् | अजयाव | अजयाम |

## 'नृत्' धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | नृत्यति | नृत्यतः | नृत्यन्ति |
| मध्यमः पुरुषः | नृत्यसि | नृत्यथः | नृत्यथ |
| उत्तमः पुरुषः | नृत्यामि | नृत्यावः | नृत्यामः |

## लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | नर्तिष्यति | नर्तिष्यतः | नर्तिष्यन्ति |
| मध्यमः पुरुषः | नर्तिष्यसि | नर्तिष्यथः | नर्तिष्यथ |
| उत्तमः पुरुषः | नर्तिष्यामि | नर्तिष्यावः | नर्तिष्यामः |

## लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अनृत्यत् | अनृत्यताम् | अनृत्यन् |
| मध्यमः पुरुषः | अनृत्यः | अनृत्यतम् | अनृत्यत |
| उत्तमः पुरुषः | अनृत्यम् | अनृत्याव | अनृत्याम |

## आरुह् धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आरोहति | आरोहतः | आरोहन्ति |
| मध्यमः पुरुषः | आरोहसि | आरोहथः | आरोहथ |
| उत्तमः पुरुषः | आरोहामि | आहोरावः | आरोहामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आरोक्ष्यति | आरोक्ष्यतः | आरोक्ष्यन्ति |
| मध्यमः पुरुषः | आरोक्ष्यसि | आरोक्ष्यथः | आरोक्ष्यथ |
| उत्तमः पुरुषः | आरोक्ष्यामि | आरोक्ष्यावः | आरोक्ष्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आरोहत् | आरोहताम् | आरोहन् |
| मध्यमः पुरुषः | आरोहः | आरोहतम् | आरोहत |
| उत्तमः पुरुषः | आरोहम् | आरोहाव | आरोहाम |

### 'स्मृ' धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | स्मरति | स्मरतः | स्मरन्ति |
| मध्यमः पुरुषः | स्मरसि | स्मरथः | स्मरथ |
| उत्तमः पुरुषः | स्मरामि | स्मरावः | स्मरामः |

### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | स्मरिष्यति | स्मरिष्यतः | स्मरिष्यन्ति |
| मध्यमः पुरुषः | स्मरिष्यसि | स्मरिष्यथः | स्मरिष्यथ |
| उत्तमः पुरुषः | स्मरिष्यामि | स्मरिष्यावः | स्मरिष्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अस्मरत् | अस्मरताम् | अस्मरन् |
| मध्यमः पुरुषः | अस्मरः | अस्मरतम् | अस्मरत |
| उत्तमः पुरुषः | अस्मरम् | अस्मराव | अस्मराम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## प्रविश् धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | प्रविशति | प्रविशतः | प्रविशन्ति |
| मध्यमः पुरुषः | प्रविशसि | प्रविशथः | प्रविशथ |
| उत्तमः पुरुषः | प्रविशामि | प्रविशावः | प्रविशामः |

## लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | प्रवेक्ष्यति | प्रवेक्ष्यतः | प्रवेक्ष्यन्ति |
| मध्यमः पुरुषः | प्रवेक्ष्यसि | प्रवेक्ष्यथः | प्रवेक्ष्यथ |
| उत्तमः पुरुषः | प्रवेक्ष्यामि | प्रवेक्ष्यावः | प्रवेक्ष्यामः |

## लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | प्राविशत् | प्राविशताम् | प्रविशन् |
| मध्यमः पुरुषः | प्राविशः | प्रविशतम् | प्रविशत |
| उत्तमः पुरुषः | प्राविशम् | प्राविशाव | प्राविशाम |

## आकर्ण् धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आकर्णयति | आकर्णयतः | आकर्णयन्ति |
| मध्यमः पुरुषः | आकर्णयसि | आकर्णयथः | आकर्णयथ |
| उत्तमः पुरुषः | आकर्णयामि | आकर्णयावः | आकर्णयामः |

## लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आकर्णयिष्यति | आकर्णयिष्यतः | आकर्णयिष्यन्ति |
| मध्यमः पुरुषः | आकर्णयिष्यसि | आकर्णयिष्यथः | आकर्णयिष्यथ |
| उत्तमः पुरुषः | आकर्णयिष्यामि | आकर्णयिष्यावः | आकर्णयिष्यामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आकर्णयत् | आकर्णयताम् | आकर्णयन् |
| मध्यमः पुरुषः | आकर्णयः | आकर्णयतम् | आकर्णयत |
| उत्तमः पुरुषः | आकर्णयम् | अकर्णयाव | आकर्णयाम |

## चिन्त् धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | चिन्तयति | चिन्तयतः | चिन्तयन्ति |
| मध्यमः पुरुषः | चिन्तयसि | चिन्तयथः | चिन्तयथ |
| उत्तमः पुरुषः | चिन्तयामि | चिन्तयावः | चिन्तयामः |

## लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | चिन्तयिष्यति | चिन्तयिष्यतः | चिन्तयिष्यन्ति |
| मध्यमः पुरुषः | चिन्तयिष्यसि | चिन्तयिष्यथः | चिन्तयिष्यथ |
| उत्तमः पुरुषः | चिन्तयिष्यामि | चिन्तयिष्यावः | चिन्तयिष्यामः |

## लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अचिन्तयत् | अचिन्तयताम् | अचिन्तयन् |
| मध्यमः पुरुषः | अचिन्तयः | अचिन्तयतम् | अचिन्तयत |
| उत्तमः पुरुषः | अचिन्तयम् | अचिन्तयाव | अचिन्तयाम |

## पाल् धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पालयति | पालयतः | पालयन्ति |
| मध्यमः पुरुषः | पालयसि | पालयथः | पालयथ |
| उत्तमः पुरुषः | पालयामि | पालयावः | पालयामः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पालयिष्यति | पालयिष्यतः | पालयिष्यन्ति |
| मध्यमः पुरुषः | पालयिष्यसि | पालयिष्यथः | पालयिष्यथ |
| उत्तमः पुरुषः | पालयिष्यामि | पालयिष्यावः | पालयिष्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अपालयत् | अपालयताम् | अपालयन् |
| मध्यमः पुरुषः | अपालयः | अपालयतम् | अपालयत |
| उत्तमः पुरुषः | अपालयम् | अपालयाव | अपालयाम |

### अवलोक् धातु, लट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अवलोकयति | अवलोकयतः | अवलोकयन्ति |
| मध्यमः पुरुषः | अवलोकयसि | अवलोकयथः | अवलोकयथ |
| उत्तमः पुरुषः | अवलोकयामि | अवलोकयावः | अवलोकयामः |

### लृट् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अवलोकयिष्यति | अवलोकयिष्यतः | अवलोकयिष्यन्ति |
| मध्यमः पुरुषः | अवलोकयिष्यसि | अवलोकयिष्यथः | अवलोकयिष्यथ |
| उत्तमः पुरुषः | अवलोकयिष्यामि | अवलोकयिष्यावः | अवलोकयिष्यामः |

### लङ् लकारः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुष | अवालोकयत् | अवालोकयताम् | अवालोकयन् |
| मध्यम पुरुष | अवालोकयः | अवालोकयतम् | अवालोकयत |
| उत्तम पुरुष | अवालोकयम् | अवालोकयाव | अवालोकयाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## ३. इमानि अपि अवलोकयत

१. दूरदर्शनम् (डी.डी. न्यूज)

(क) वार्ता ६.५५ प्रातः प्रतिदिनम्

(ख) वार्तावली ७.०० सायं शनिवासरे (समयः परिवर्तनशीलः)

(ग) वार्तावली पुनः ३.३० अपराह्णे बुधवासरे (समयः परिवर्तनशीलः)

२. आकाशवाणी (आल इंडिया रेडियो) प्रातः सायं (प्रतिदिनम्)

३. वृत्तपत्राणि (मैगजींस)

| क्रम-संख्या | नाम | प्रकाशनस्थलम् | आवृत्तिः |
|---|---|---|---|
| १. | सुधर्मा | चेन्नई | दैनिकम् |
| २. | गन्धवहः | दिल्ली | मासिकः |
| ३. | ब्रजगन्धा | वृन्दावनः | मासिकः |
| ४. | भारती | जयपुरम् | मासिकः |
| 5. | सम्भाषण-सन्देशः | बंगलौर | मासिकः |
| ६. | चन्दामामा | बंगलौर | मासिकः |
| ७. | अभिव्यक्ति-सौरभम् | प्रयागः | मासिकः |
| ८. | स्वरमंगला | जयपुरम् | त्रैमासिकम् |

4. समाचार-सन्देश-सुविधा

AIR<space>S इति सन्देशं 7738299899 प्रति प्रेषयित्वा स्वजङ्गमदूरवाणी संख्या (Mobile No.) पञ्जीकरणं करणीयम्। तेन प्रतिदिनं दैनिकवार्ताः संस्कृतमाध्यमेन जङ्गमदूरवाणीमध्ये सन्देशरूपेण आयान्ति। एतत् सुविधा निःशुल्कं वर्तते।



Downloaded from https:// www.studiestoday.com